

कौमारम्

शिशुगीतसंकलनम्



मिश्रोऽभिराजराजेन्द्रः

लोकप्रियसाहित्यग्रन्थमाला - 1

कौमारम्

(शिशुगीतसङ्कलनम्)

प्रधानसम्पादकः

प्रो. राधावल्लभत्रिपाठी

त्रिवेणीकविः

मिश्रोऽभिराजराजेन्द्रः

राष्ट्रपतिसम्मानालङ्कृतः
इलाहाबाद-उदयन-शिमलाविश्वविद्यालयीयोऽध्यापकः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलपतिचरः

राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
नवदेहली

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
५६-५७, इन्स्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-११००५८
दूरभाषक्रमाङ्कः - 28520976
टेली-फेक्स् - 28524532
e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

ISBN : 81-86111-63-8

प्रथम संस्करणम् 2008

मूल्य : **190**/- रू.

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-9

प्राक्कथनम्

अपारे काव्यसंसारे सहस्रशो महाकवयः स्वरचनावचनावलीमुक्तावलीभिर्वाग्देवतां विभूषितवन्तः। परन्तु केषाञ्चिदेव सरस्वती अलोकसामान्यं परिस्फुरन्तं प्रतिभाविशेषं प्रकटीकरोति। एतेष्वपि तादृशा विरला एव भवन्ति कृतिनः सुकृतिनो रचनाकारा येषां रचनासु यथैव समुज्ज्वलं प्रातिभं ज्योतिः, तथैव सकलशास्त्रपारङ्गमत्वम्, युगानुकूलाभिव्यक्तिः विविधविधासु च पाटवमिति अनन्यसामान्या गुणाः स्फुरन्ति। नैकस्मिन् कवौ प्रायो दृश्यते समवायः समेषामपि काव्यगुणानाम्। समकालिके संस्कृतसाहित्येऽपि द्वित्राः पञ्चषा एव वा महाकवयो येषामवदानं शाश्वतकीर्तये कल्पेत। एतेषु मिश्रोऽभिराजराजेन्द्रः सत्यमेव महीयते।

विदितचरमेव विदुषां यत् साम्प्रतिके काले विविधविधासु विरच्यते संस्कृते विपुलं वाङ्मयम्। अभूतपूर्वैव तावदास्ते समृद्धिरस्य साम्प्रतिकसंस्कृतसाहित्यस्य। तत्रापि अभिराजराजेन्द्रमिश्रस्य अनन्यसामान्या उपलब्धयो विस्मापयन्ति विदग्धजनानां मनांसि। सरलसरलया ललितमधुरया गिरा गुम्फितानि अस्य वाक्यानि महावाक्यायन्ते। महाकाव्य-खण्डकाव्य-गीतिकाव्य-मुक्तक-स्तोत्र-शतक-कथा-निबन्धोपन्यास-रूपक-प्रभृतिविविधविधासु पृथुलं साहित्यं सुकविनाऽनेन विरचितम्। तत्रापि अस्य गीतानि सन्ति सर्वथा श्रवणाञ्जलिपुटपेयानि। यति-लय-गति-समन्वितानि तान्यस्य गीतानि लोकम्पृणानि सचेतसां संस्कृतज्ञानां सर्वथा मनांसि हरन्ति, लोकगीतमाधुरीं च विभावयन्ति। गीतेषु या भावना अनेनाभिव्यक्तिं नीतास्ता जनानां हृदयं गाहन्ते। तेनायं वस्तुतो जनकविः। आत्मपरिचयपुरस्सरं स्वयमेतेन विलिखितम्-

जडानां को नु लाभो मम बृहत्कथया मदान्धानां
गुणाढ्योऽहं पिशाचानेव सदयं श्रावयिष्यामि॥

तथैवान्यत्राप्यूचे-

नन्दनवनसुरतरुरपि नाहम्
घनच्छायजनपथनीपोऽहम्॥

यद्यपि प्राचुर्येण प्रसरन्ति लेखन्यः तेषु तेषु काव्यप्रकारेषु संस्कृतरचनाकाराणां सम्प्रति, परन्तु कासुचित् विधासु स्वल्पमेव साहित्यं सम्प्रति रचितं विरच्यते वा। बालसाहित्यमपि तादृशमेव प्रस्थानं यत्र साधीयस्यो रचना विरला वरीवर्त्यन्ते। साम्प्रतिके संस्कृते। अभिराजराजेन्द्रमिश्रेण न केवलं सरसानि गीतानि प्रणीतानि, बालकानां कृतेऽपि साहित्यरचनाः कृता इति दुर्लभो मणिकाञ्चनयोगोऽनेन साधितः।

तैनैवेतेन महाकविना अभिराजराजेन्द्रमिश्रेण राष्ट्रियसंस्कृतसंस्थानस्यानुरोधमूरीकृत्य स्वकीयं हृद्यनिरवद्यगीतोपेतं सुकुमारमतीनां कुमाराणां कृते विरचितं कौमारं नाम सचित्रं सङ्कलनमिदं प्रदत्तमिति संस्थानं तस्य कृते भृशमधमर्णतां बिभर्ति। कौमारं कण्ठहारो भविष्यति भारतभविष्यभूतानां अभिनवभरतानामिति आशास्महे।

-राधावल्लभः

कविवाक्

देववाणी संस्कृत का काव्यवाङ्मय यद्यपि अत्यन्त समृद्ध, विविध, विपुल एवं उत्कृष्ट है, तथापि प्राचीन वाङ्मय में 'शिशुकाव्य' का अभाव सा दिखाई पड़ता है। महाकवि कालिदास-प्रणीत अभिज्ञानशाकुन्तल नाटक में कुमार भरत (रिपुदमन) के सन्दर्भ में एकमात्र श्लोक 'आलक्ष्य दन्तमुकुलाननिमित्तहासैः' मिलता है जिसे हम निरवद्य रूप से 'शैशववर्णन' मान सकते हैं। ऐसे ही दो-चार और सन्दर्भों के अतिरिक्त समूची संस्कृत काव्ययात्रा 'शैशववर्णन' से प्रायः विरहित है। वस्तुतः इसी कमी को अनुभव करते हुए मैंने स्वोपज्ञ **'जानकीजीवनम्'** महाकाव्य के द्वितीय सर्ग में भगवती सीता के शैशव का सांगोपांग वर्णन किया, जो संभवतः एकमात्र शैशववर्णन है – समूचे संस्कृत काव्यवाङ्मय में। परन्तु प्रबन्धकथा का अंश होने के कारण वह शैशववर्णन भी 'सामान्य शिशुकाव्य' नहीं माना जा सकता।

'कौमारम्' काव्यसंग्रह में मैंने स्वतंत्र रूप से शिशुकाव्यों का संग्रह किया है। ये कविताएँ बच्चे के विकासोन्मुख जीवन के क्रम में ही, उत्तरोत्तर विकास की सूचक हैं। इनके विषय हैं – ईश्वरवन्दना, परिवार, माता-पिता, विद्यालय, विद्यालय की शिक्षा, परिवेश (गाँव, नदी, बाग, रेलगाड़ी, बन्दर का नाच) अनुभव (तितली, मधुमक्खी, चींटी, आकांक्षा, स्वप्नानुभव आदि) तीज-त्यौहार तथा राष्ट्रीयता का बोध!

चित्रों के साथ प्रकाशित यह शिशु-काव्यसंग्रह निश्चय ही बच्चों को आकृष्ट करेगा, यह मेरा दृढ़ विश्वास है। इन कविताओं में लयमाधुरी एवं शिक्षा दोनों है। बच्चे बड़ी सरलता से इन गीतों को कण्ठस्थ कर सकते हैं। इस संग्रह की अधिकांश कविताएँ बन्धुरत्न आर्य नरेन्द्र द्वारा **लोकसंस्कृतम्** (संस्कृत त्रैमा. अरविन्दाश्रम, पाण्डीचेरी) में प्रकाशित की जा चुकी हैं। अतः

संस्कृत पाठकों के लिये पूर्णपरिचित एवं गृहीतास्वाद हैं। तथापि इनकी ग्रंथाकार प्रस्तुति से उन्हें विशेष सुखानुभूति होगी। इसी आशा के साथ यह संग्रह पाठकों को अर्पित कर रहा हूँ।

संस्कृत-जगत् के शलाका-विपश्चिद्रत्न, अर्वाचीन संस्कृत कविता के सर्वमान्य हस्ताक्षर तथा मानित विश्वविद्यालय राष्ट्रिय संस्कृत संस्थान, नई दिल्ली के सद्यः प्रतिष्ठापित कुलपति आचार्य राधावल्लभ त्रिपाठी जी ने सहृदयतापूर्वक इस काव्य को विश्वविद्यालय की लोकप्रियसाहित्यमाला के पुष्प-रूप में प्रकाशित करने की कृपा की है, फलतः यह ग्रन्थ पूर्ण गरिमा एवं साज-सज्जा के साथ प्रकाशित हो रहा है। एतदर्थ मैं कुलपति जी के प्रति हार्दिक कृतज्ञता व्यक्त करता हूँ।

बन्धुरत्न डॉ. प्रकाश पाण्डेय को हार्दिक आशीः देता हूँ उनके उपाय-कौशल के लिये, जिसकी सुखद परिणति है कौमारम् की यह त्वरित प्रस्तुति!

अभिराज डॉ0 राजेन्द्र मिश्र

११

कौमारम्

॥ शिशुगीतसङ्कलनम् ॥

गीतशीर्षकम्

लोकप्रियसाहित्यमाला - 1

कौमारम्

(शिशुगीतसङ्कलनम्)

प्रधानसम्पादकः

प्रो. राधावल्लभत्रिपाठी

त्रिवेणीकविः

मिश्रोऽभिराजराजेन्द्रः


राष्ट्रपतिसम्मानालङ्कृतः

इलाहाबाद-उदयन-शिमलाविश्वविद्यालयीयोऽध्यापकः

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयकुलपतिचरः


❑ परमेश्वरवन्दनम्

1. यशस्तस्य नित्यं गायामः॥




येन निर्मिता पर्वतमाला
गगनचुम्बिनी परम विशाला
तं परमेशं सदा नमामः।
यशस्तस्य नित्यं गायामः॥

नक्रमकरझषवीचिविहारः
येन निर्मितः पारावारः
तं जगदीशं सदा नमामः।
यशस्तस्य नित्यं गायामः॥



तारकचन्द्रविवृद्धाभासम्
येन कल्पितं नीलाकाशम्
तं सर्वेशं सदा नमामः।
यशस्तस्य नित्यं गायामः॥

सुमसौरभमकरन्दगभीरः
येन वर्तितो मलयसमीरः
तं करुणेशं सदा नमामः।
यशस्तस्य नित्यं गायामः॥




येन कृता गतिलोलकुरङ्गाः
शुकसारिकापिकादिविहङ्गाः
तं जीवेशं सदा नमामः।
यशस्तस्य नित्यं गायामः॥

विविधाख्याऽऽकृतिवर्णरसानि
येन तरुषु विहितानि फलानि
तं रसिकेशं सदा नमामः।
यशस्तस्य नित्यं गायामः॥




दीनकृपणदलितानां बन्धुः
दयाकृपाकरुणाक्षतसिन्धुः
तं भुवनेशं सदा नमामः।
यशस्तस्य नित्यं गायामः॥


अपसारय लोचनान्धकारम्
ज्ञानं देहि हर भ्रमभारम्
त्वां विश्वेशं सदा नमामः।
यशस्ते नु नित्यं गायामः॥




❑ सृष्टिपरिचयः

2. परमेश्वरं न तं जानीथ?












लिक्षादृष्ट्या घुणो विशालः
घुणदृष्ट्या मधुमक्षी।
मक्षीतोऽपि विशालः शलभः
शलभाच्चटकः पक्षी॥
चटकाद्भवति विशालः काकः
काकाच्चिल्लो गृद्ध्रः।
गृद्ध्रादपि जम्बुको विशालः
श्वा तस्माच्च समृद्धः॥





व्याघ्रो भवति शुनोऽपि विशालः

व्याघ्राद् बर्बरसिंहः।


सिंहाद् भवति विशालो महिषो


गण्डस्ततोऽपि जिह्मः।।


गण्डादपि गुरुको जलहस्ती


तस्मादपि क्रमेलः।

क्रमेलकाद् गुरुको मातङ्ग-









स्ततो ऽपि मत्स्यो ह्वेलः॥

ह्वेलादपि च विशालाकारौ

सघनौ जम्बुकपित्थौ।


ताभ्यामपि च विशालौ विपिने

ननु पर्कट्यश्वत्थौ॥

अश्वत्थादपि भवति विशालो










महाद्रुमो न्यग्रोधः।
हन्त! ततोऽपि विशालश्शैलः
शतश्रृङ्गोऽथ नभोगः॥
वत्साः प्रश्नः क्रियते सम्प्रति
समाधत्त सुस्पष्टम्!!
शैलादपि सुविशालं किञ्चित्



किं युष्माभिर्दृष्टम्?
लिक्षातश्शैलं यावद् भो
यो विदधे संसारम्।
परमेश्वरं न तं जानीथाऽ
खण्डमण्डलाकारम्!!



❑ सर्वधर्मसमभावः

3. परमेश्वरं य एकं पश्यति!!



एकस्यैव जगन्निर्मातुः
सृष्टिरियं सुविशाला।
ख्रिस्तीये धर्मेऽसौ गॉडः
इस्लामेऽल्लाताला॥
सिक्खसम्प्रदाये ऽसौ ख्यातः
वाहे गुरुरितिनामा।
बौद्धे जैने मते बोधि-
सत्त्वस्तीर्थङ्करधामा॥
सर्वधर्ममूलतां बिभर्ति
किन्तु वैदिको धर्मः।
यस्मिन् सर्वधर्मसमवायः
पुरुषार्थोऽसौ परमः॥
वस्तुत एक एव परमेशः

विविधनामभिः ख्यातः।
विधः सर्जने विष्णुर्भरणे
ध्वंसे शिव आम्नातः।।
सो ऽवतरति भूतले कदाचिद्
धर्मस्थापनकामः।
मत्स्यकूर्मसूकरनृसिंहभृत्
रघुनाथो घनश्यामः।।
परमेश्वरं य एकं पश्यति
स भवति सुखी निकामम्।
जगदखिलं स्वकुटुम्बं मनुते
समञ्जसञ्च ललामम्।।
वर्णधर्मभाषाभिर्भिन्नः
कामं जनसमुदायः।
किन्तु पृथङ्नो जगत्सर्जकः
परमेश्वर उरुगायः।।
विश्वमेकनीडं पश्यत भो
विततविशालकुटुम्बम्।
सोदरमिव जानीत समग्रं
विश्वमनुजनिकुरम्बम्।।

❑❑

❑ परिवारसदस्यपरिचयः

4. मम परिवारः

खेलाम्यहं पितामहवक्षसि
सततं पितामहीक्रोडे।
बालविहङ्गो यथा निर्भरं
स्वपिति दृढच्छन्ने नीडे॥



जननी मां पाययति क्षीरं
सस्नेहं लालयति चिरम्।
क्वचिद् दर्शयति काकं चटकां
मातुलचन्द्रं नभः स्थिरम्॥

नयत्यात्मना सह तातो मे
क्षेत्रेष्वथ बहिरुद्याने।
यत्र सदा नृत्यन्ति मयूराः
शुकाः पिकाश्च रता गाने॥





समायोजिते गृहमहोत्सवे
पितृष्वसा ऽपि समायाति।
मातृष्वसाऽथ मामो नानः
सम्मर्दैर्गृहमाभाति॥

समवायैस्सोदरभगिनीनां
सञ्जायते गृहे मेला।
नर्तनकूर्दनधावनादिभिः
प्रवर्तते नित्यं खेला॥



प्रणमाम्यहं प्रभाते सर्वान्
ततः पठामि लिखामि मुदा।
जननी कथयति भविष्याम्यहं
श्रेष्ठजनो ऽनेनैव पथा॥


❑❑

❑ जननीमाहात्म्यम्

5. मम जननी



हरितः संदृश्यते पादपो यथा रसार्द्रधरण्या
हृष्टः पुष्टस्सदा प्रसन्नः अहमपि तथा जनन्या।।
अमृतं वर्षति जननी वदनं
मधुचुम्बनपरिपूतम्।
भाति सदा तल्लोचनयुगलं
वत्सलताऽनुस्यूतम्।।
कियदपि दुःखं कियदपि दैन्यं कियत्यपि स्यात्पीडा।
मातुः क्रोडे नश्यति सर्वं भाति यथा वा क्रीडा।।
जाते ज्वरे किमौषधादिकैः
मातृकरस्पर्शोऽलम्।
अमृतमयं तत्सुखालिङ्गनं
स्वास्थ्यवर्धकं तरलम्।।



नहि शक्नोमि जीवितुं क्षणमपि जननीं विनाऽत्र लोके।
दीपाशिखाऽस्ते सैव तमसि मे, परमसान्त्वना शोके।।
पिता प्रियो मे, किन्तु ततोऽपि
प्रियाऽधिका मे जननी।
सैव जन्मदा,सैव शर्मदा
सैव विपद्भयहरणी।।



मातुः क्रोडे निखिलमङ्गलं निखिला मे ऽस्ति सुरक्षा
शतं समा जीवतु मे जननी विभो! ममेयं भिक्षा।।

❑❑

❑ शरीराङ्गपरिचयः

6. प्रथमोऽप्यहं भवामि!!

कर्णाभ्यां वार्तां शृणोमि
पश्यामि पुनर्नयनाभ्याम्।
नासिकया जिघ्रामि सौरभं
कर्म करोमि कराभ्याम्।।



कङ्कतिकादन्तैः प्रतिदिवसं
केशान् प्रसाधयामि।
वज्रदन्तचूर्णैर्ननु दन्तान्
प्रातः विशोधयामि।।

भाले भस्मलेपनं कृत्वा
पदयोः पादत्राणे।
धृत्वा ऽहं यात्रां करोमि
सन्दधे मतिं कल्याणे।।

हृदये हर्षं, मनसि मार्दवं
बुद्धौ परोपकारम्।
अनुभवामि नित्यं स्वकुटुम्बं
निखिलमेव संसारम्।।

युगलकपोले चुम्बति माता
चिबुकोपरि लालयते।
उदरं पृष्ठं किञ्च शीर्षकं
क्वचित्पुनः सारयते।।





ऊरु-जानु-गुल्फैः सुदृढोऽहं
द्रुतं-द्रुतं धावामि।
विद्यालये प्रतिस्पर्धायां
प्रथमोऽप्यहं भवामि।।

❑❑

❑ मातुलचन्द्रगीतम्

7. मातुल चन्द्र!



कुत आगच्छसि मातुल चन्द्र!
कुत्र गमिष्यसि मातुल चन्द्र!!
अतिविस्तृतो नील आकाशः
नैव दृश्यते क्वचिदवकाशः
कथं प्रयास्यसि मातुल चन्द्र!
कुत आगच्छसि मातुल चन्द्र!
कृशो लक्ष्यसे भूयोभूयः
पुनर्वर्धसे भूयोभूयः

कथमभिनेष्यसि मातुल चन्द्र!
कुत आगच्छसि मातुल चन्द्र!!
क्षीरं वितरसि, वितरसि भक्तम्
भणतीत्यम्बा निभृतं नक्तम्
क्षुधां हरिष्यसि मातुल चन्द्र!
कुत आगच्छसि मातुल चन्द!!
कथमायासि न भो मम गेहम्
मातुल! किरसि कथं न स्नेहम्
कदाऽऽगमिष्यसि मातुल चन्द्र!
कुत आगच्छसि मातुल चन्द्र!
रात्रावेव कथं समुदेषि
किं दिवसे दिनकराद् बिभेषि!
हास्यपुपैष्यसि मातुल चन्द्र!
कुत आगच्छसि मातुल चन्द्र!!
धवलं तव चन्द्रिकावितानम्
तारकखचितं सितपरिधानम्
मह्यं दास्यसि मातुल चन्द्र!
कुत आगच्छसि मातुल चन्द्र!!
त्वरितमेहि मां श्रावय गीतिम्
प्रिय मातुल! वर्धय मे प्रीतिम्
किन्नायास्यसि मातुल चन्द्र!
कुत आगच्छसि मातुल चन्द्र!!

❑❑

❑ मेघपरिचयः

८. कुतोन्वागताः पयोदाः?



अम्ब! कुतो न्वागताः पयोदाः।
अम्ब! कुतस्त्या इमे पयोदाः॥
केन निर्मिताः केन वर्धिताः
केन विविधवर्णैश्च रञ्जिताः
केन नभसि सञ्चिताः पयोदाः!
अम्ब! कुतस्त्या इमे पयोदाः॥
क्षणे शशाः क्षण एव सैरिभाः
प्लवगविहगगजराजसन्निभाः

इन्द्रजालमनुगताः पयोदाः।
अम्ब! कुतस्त्या इमे पयोदाः॥
द्रुतगत्या धावन्ति नदन्ति
सहसैते वर्षन्ति पृषन्ति
चपलाभिस्सङ्गताः पयोदाः।
अम्ब! कुतस्त्या इमे पयोदाः॥
क्व नु गोपितं तदम्बुनिधानम्।
कियत्स्थायि ननु कियत्प्रमाणम्!
केन साधु परिचिताः पयोदाः।
अम्ब! कुतस्त्या इमे पयोदाः॥
जलदो जननान्तरे भवेयम्
लोकमिमं वृष्ट्या सुखयेयम्
उपकुर्वन्त्यभिमताः पयोदाः।
अम्ब! कुतस्त्या इमे पयोदाः!!

❑❑

❑ स्वप्नसन्दर्शनाऽनुभूतिः

9. दृष्टः स्वप्न एकः



अद्य रात्रौ मया दृष्टः स्वप्न एकः
अम्ब! सत्यं मया दृष्टः स्वप्न एकः॥
यथा मम देहे भवेयु पक्षमालाः
क्रोशमितदीर्घा ममाङ्गुलयो विशालाः



उड्डये नीलाम्बरेऽहं तीव्रवेगः
अम्ब! सत्यं मया दृष्टः स्वप्न एकः॥

अहमपश्यं तत्र चन्द्रं विविधरूपम्
तारकानिकरं सितं मुक्ताऽनुरूपम्

पुलकिते देहेऽभवद्धर्षाऽतिरेकः
अम्ब! सत्यं मया दृष्टः स्वप्न एकः॥


उपवने ऽप्सरसो नु तत्र परिभ्रमन्त्यः
उच्छलन्ति मिथः पतन्ति कलं हसन्त्यः



मन्दवातोऽवहत् कृतगन्धाऽभिषेकः।
अम्ब! सत्यं मया दृष्टः स्वप्न एकः॥

कोकिला जलकुक्कुटा हंसा बलाकाः
तित्तिराः शुकसारिकाः जल्पन्ति काकाः

नर्तनं कुरुते मयूरो मधुरकेकः
अम्ब! सत्यं मया दृष्टः स्वप्न एकः॥
हन्त! तारकमौक्तिकानि यदा ग्रहीतुम्
मया हस्तौ सारितौ विपुलं वरीतुम्



तावदेव विनिद्रितोऽहं भीतिभेकः
अम्ब! सत्यं मया दृष्टः स्वप्न एकः॥
पूर्वमिव जाता ममाङ्गुलयोऽतिदीनाः
ते च पक्षा नैव जाने कुत्र लीनाः
क्व नु गतोऽसौ स्वप्नसंसारो मदेकः।
अम्ब! सत्यं मया दृष्टः स्वप्न एकः॥

❑❑

❑ विद्यालयपरिचयः

10. अयं विद्यालयो मे!!



अयं विद्यालयो मे
अयं शिक्षालयो मे॥
यदीये बाहुपरिधौ मया मुक्तोऽन्धकारः

यदीये धूलितल्पे मया लिखितः ककारः
अयं ज्ञानालयो मे
अयं विद्यालयो मे॥

वयस्यैर्दीनधनिकैस्समं सम्पाद्य कृत्यम्
प्रथमतोऽत्रानुभूतं भवति किन्नाम सख्यम्
अयं सख्यालयो मे
अयं विद्यालयो मे॥

इमाम्भो माऽवमंस्थास्तृणोपच्छन्नशालाम्
ध्रुवं विगणय महार्घां वरदमणिरत्नमालाम्
अयं ममतालयो मे
अयं विद्यालयो मे॥



पितृभ्यामपि महीयान् गुरुर्मे शम्भुकल्पः
प्रबुद्धो यत्कृपातः प्रनष्टोऽज्ञानदर्पः
अयं बोधालयो मे
अयं विद्यालयो मे॥


भवेयं भाविकाले भिषग्वा यान्त्रिको वा
स्मरिष्याम्येनमनिशं मृतो वा जीवितो वा
अयं प्राणालयो मे
अयं विद्यालयो मे॥

❑❑



❑ वर्णमालापरिचयः

11. कः किं सूचयति?





कः सूचयति कपोतं कमलं
खः कथयति खद्योतम्।
गः सूचयति गवाक्षं गरुडं
घः घण्टां घनपोतम्॥



चः सूचयति चक्षुषी चटकां
छः छत्रं ननु छागम्।
जः जनार्दनं जननीं ब्रूते
झः झर्झरं सुवाद्यम्॥

टः टङ्कं टिट्टिभकं तनुते
ठः ठक्कुरं नरेशम्।
डः डमरुं डिण्डिमं डिम्भकं
ढः ढक्कां प्रमथेशम्॥








तः तनयं तनुते तथागतं

थः थूत्कृतमनभीष्टम्!

दः दर्पणं सूचयति दशनं

धः धनुर्धरं श्रेष्ठम्।।









नः नक्रं नगपतिहिमालय

पः पनसं च पताकाम्।

फः सूचयति फलं ननु फणिनं

बः बर्हिणं बलाकाम्।।








भः भक्तं सूचयति भवानीं


मः मन्दिरं पवित्रम्।

यः यज्ञं रः रथं रसालं

लः लूताञ्च लवित्रम्।।

वः वत्सकं वटं शः शशिनं
षः षट्पदं षडास्यम्।
सः सज्जनं सारसं तनुते
हः हंसं सदुपास्यम्।।

क्षः क्षुरकं त्रः त्र्यम्बकदेवं
ज्ञः ज्ञानिनं प्रसूते।
गायं गायं सुमधुरगीतं
शब्दान् शिशुः वृणीते।।


❑❑

❑ पशुपक्षिपरिचयः


12. कोऽयं पक्षी?



कोऽयं पक्षी।
अयं कोकिलः
कूजति कथमिव?
'कुहू-कुहू'॥



अयमपरः कः?
अयं चातकः
रटति कथमयम्?
'पिहू-पिहू'॥



कोऽयं पशुः?
अयं खलु छागः
भणति कथमयम्?
'में-में-में'॥



अयमपरः कः?
अयमपि मेषः
ब्रूते किमयम्?
'भें-भें-भें'॥


गजमनुधावति
पश्य, कुक्कुरः
कथं नु बुक्कति?
'भों-भों-भों'॥



समुच्छलति
शाखासु वानरः
कथं भाययति?
'खों-खों-खों'॥



क्रन्दति कथम्
गृहीता चटका
कथञ्च रोदिति?
'चें-चें-चें'॥



मातृभर्त्सितः
लघुबालोऽयम्
कथं प्रकुप्यति?
'नें-नें-नें'॥




❑❑

❑ संख्यासंयोजनपरिचयः

13. कियन्नु सर्वम्?









एकं फलं त्वदीये हस्ते द्वे फले च शाखायाम्
त्रीणि फलानि काष्ठफलकोपरि दृश्यन्ते शालायाम्।
माणवकाः संयोज्य वदत, सर्वाणि फलानि कियन्ति?
एकं द्वे त्रीणीति तानि खलु षट्संख्यानि भवन्ति।।



एका चटका स्थिता गवाक्षे द्वे चटके प्रोड्डीने
तिस्रश्चटका बहिरुद्याने संक्रीडन्ते पीने।
माणवकाः संयोज्य वदत, सर्वा एता नु कियत्यः?
एका द्वे तिस्रश्चटकास्ताः षट्संख्या गतिमत्यः।।




एकः शुकः पञ्जरे तिष्ठति, शुकौ द्वौ च सहकारे
शुकास्त्रयो विहरन्त्याकाशे जलधरहीनेऽपारे
माणवकाः संयोज्य वदत, सर्वे पक्षिणः कियन्त!
एको द्वौ च त्रयस्समुदिताः शुकाः षडेव चरन्तः॥



एको हस्ती द्वौ च घोटकौ , तिस्रः पुनर्महिष्यः
चत्वारो वृषभाश्च , धेनवः पञ्च , षट् च गर्दभ्यः
परस्परं संयोज्य सर्वमेतद् वदन्तु माणवकाः
उपाध्याय! योजितं , पशूनां भवत्येकविंशतिका।।














सप्त सारसा, अष्ट वानरा, नव कदम्बपुष्पाणि
दश यात्रिणो दशैव भिक्षुकास्त्रीणि च नव्यगृहाणि
परस्परं संयोज्य वदत वत्सकाः कियन्ननु सर्वम्।
सप्तोत्तरचत्वारिंशन्मितमितिमात्रं किल सर्वम्॥

14. कण्ठस्थं कुरु!!


द्वयोर्द्विगुणितं भवति तुरीयम्	2x2=4 (तुरीयम्)
कण्ठस्थं कुरु!	
द्वयोस्त्रिगुणितं जनयति षट्कम्	2x3=6 (षट्कम्)
कण्ठस्थं कुरु!	
द्वयोश्चतुर्गुणितं तदष्टकम्	2x4=8 (अष्टकम्)
कण्ठस्थं कुरु!	
द्वयोः पञ्चगुणितं ननु दशकम्	2x5=10 (दशकम्)
कण्ठस्थं कुरु!	
द्वयोर्नु षड्गुणितं द्वादशकम्	2x6=12 (द्वादशकम्)
कण्ठस्थं कुरु!	
द्वयोः सप्तगुणिता चतुर्दशी	2x7=14 (चतुर्दशी)
कण्ठस्थीकुरु!	
द्वयोरष्टगुणिता च षोडशी	2x8=16 (षोडशी)
कण्ठस्थीकुरु!	
नवगुणिताऽष्टादशी तदुभयोः	2x9=18 (अष्टादशी)
कण्ठस्थीकुरु!	
दशगुणिता च तयोर्विंशतिका	2x10=20 (विंशतिका)
कण्ठस्थीकुरु!	

माणवकाः यन्मया शिक्षितम्
कण्ठस्थं कुरु!
बहुमूल्यं प्रतिपलं जीवने
मा व्यर्थीकुरु।।

❑❑

❑ सहृदयतापरिचयः

15. हृदयं विधेहि॥



हृदयं विधेहि वितताऽऽकाशम्
उदयेद्यथा कामनाचन्द्रः।
हृदयं विधेहि ककुबवकाशं
प्रवहेद्यथाऽनिलो मृदुमन्दः॥
हृदयं विधेहि शुक्तिसमानं
जनयेद्यथा मौक्त्तिकं धवलम्।
हृदयं विधेहि मेघवितानं
वर्षेद्यथा प्राणदं सलिलम्॥
हृदयं विधेहि मधुसहकारं
कूजेद्यथा पिकः प्रतिशाखम्।
हृदयं विधेहि पारावारं
यथोच्छलेल्लहरी प्रतिवातम्॥

हृदयं विधेहि विकसितकुसुमं
प्रसरेद् दिशि-दिशि यथा सुगन्धः।
हृदयं विधेहि मलयजपवनं
यथाऽखिले स्याच्चन्दनगन्धः॥
हृदयमिक्षुदण्डं विधेहि भो
क्षुण्णोऽप्यधिकं रसं च्यावयेत्।
हृदयमगुरुकल्पं विधेहि भो
दग्धोऽप्यधिकं मुदा भावयेत्॥
हृदयं विधेहि देवाऽयतनं
सत्यं शिवं सुन्दरं प्रभवेत्।
हृदयं विधेहि सेवासदनं
जगदुपकरणं यथा सम्भवेत्॥

❑❑

❑ तित्तिलिका परिचयः

16. अयितित्तिलिके!!



अयि तित्तिलिके!
द्रुतपक्षतिके! क्षणमात्रमपि स्थिरता न कुतः?
रसपानपरे!
गगनोद्गतिके! सततोड्डयनाद् विरता न कुतः?
तव पक्षयुगं शबलं शबलम्
बहुचित्रयुतं धवलं धवलम्
भ्रमसि ध्वनिहीनगतिर्विपिने
तव नश्यति निर्भयता न कुतः!!
विटपाद् विटपं कुसुमात्कुसुमम्
विजनाद् विजनं भवनाद् भवनम्
त्वमनारतमेव समाश्रयसे
अपयाति वनेचरता न कुतः!!

कियती बृहती रसपानतृषा
परिधावसि यत्त्वमनेकदिशा
कियदात्मबलं लघुसंहनने
तिलमात्रमपि श्लथता न कुतः!!

प्रतिभासि परां सुषमां दधती
सुरलोकविभूतिमयी भवती
धिगिमामसमञ्जसतां यदि ते
विधिना विहिताऽमरता न कुतः!!

चलपारदबिन्दुनिभा भ्रमणैः
हृदयं नयने हरसि क्रमणैः
भवतादुपकारमयाचरणै-
स्तव जीवनसार्थकता न कुतः!!

❑❑

❑ मधुमक्षिकापरिचयः

17. कुतः शिक्षिता त्वया कलेयम्?



अयि मधुमक्षि! कलावति! चतुरे!
कुतः शिक्षिता त्वया कलेयम्!!
कथं रसं तिक्ताम्लकषायं
गुणवति! कुरुषे त्वं मधुपेयम्!!

पुष्पं-पुष्पं यासि पतन्ती
मधुरं-मधुरं लघु गायन्ती।
क्वचिदासीना क्वचित्सरन्ती
क्व नु मार्गयसि पदं सुस्थेयम्॥

विकसितकुसुमं दर्शं दर्शं
हृदयन्ते तनुतेऽमिततहर्षम्।
नटसि नटीव तदभिनन्दन्ती
शनकैः कथयसि तत आख्येयम्॥

पवनान्दोलितपुलकितगात्रं
त्वामवगम्य जनं सत्पात्रम्।
तुभ्यमर्पयति ननु मधुकोशं
चिरसञ्चितं कुसुममनुमेयम्॥

सर्वानुभवविस्मरणशीला
पिवसि रसं सदयं धृतलीला।
पुनरुत्पतसि निपीय यथेष्टं
स्वगृहमुपैषि निभृतपाथेयम्॥

विविधरसास्ते त्वया निगीर्णा
अमृतायन्ते सकृदुद्‌गीर्णाः
मुखवान्तं ते मधु कमनीयं
भवति सदौषधमामयदेयम्॥

त्वां विद्राव्य निपात्य सरोषं
मुष्णन्त्यधमास्तव मधुकोषम्।
परोपकारिणि! सुचरितशीले!
तव जीवनं सततमध्येयम्॥

❑❑

❑ पिपीलिकापरिचयः

18. पिपीलिके! क्व गम्यते?



पिपीलिके! क्व गम्यते!
वृथा श्रमो वितन्यते॥
क्व ते गृहं क्व बान्धवाः
सुता भवन्ति वा न वा?
कृते नु कस्य ताम्यते?
पिपीलिके! क्व गम्यते?
पथि प्रयासि निर्भयम्
न सत्यमेव ते भयम्?
गतागतं न चिन्त्यते
पिपीलिके! क्व गम्यते॥
लघून्यहो पदानि ते
न यातुमाशु शक्यते
तथाऽप्यलं प्रयत्यते।
पिपीलिके! क्व गम्यते!!

अवैमि ते सदुद्यमम्
महान्तमध्वविक्रमम्
जगत्त्वयैव शिक्ष्यते।
पिपीलिके! क्व गम्यते॥

गजोऽपि यत्र न क्षमः
तवास्ति तत्र सत्क्रमः
अतः परं किमर्ज्यते!
पिपीलिके! क्व गम्यते॥

चलो वृणोति वन्दनम्
स्थिरस्य किन्नु जीवनम्?
त्वयैतदेव मन्त्र्यते!
पिपीलिके! क्व गम्यते!!

प्रयच्छ मे स्वशिष्यताम्
तनुष्व मे मनुष्यताम्
सृतिस्तवैव गृह्यते!
पिपीलिके! क्व गम्यते!!

❑❑

❑ मार्कटिकपरिचयः

19. मार्कटिकोऽयं भ्रमति ग्रामे!!



डिमिक्डिमक् वादयन् डमरुकं
मार्कटिकोऽयं भ्रमति ग्रामे॥

एहि सुधाकर! मोहन! सोहन!
कमले! विमले! रमे! बलाके!
प्रदर्शयिष्यति वानरनृत्यं
सर्वसमक्षं बहिरारामे॥

परिधिं रचय वर्तुलाकारं
मौनं भज, मा कुरु सीत्कारम्।
मा मा शातय वानरयुगलं
तिष्ठ, न धाव दक्षिणे-वामे॥

प्रारभते खलु वानरनृत्यं
कियद्विचित्रं कियच्च सत्यम्।
पादकिङ्किणी झणझणायते
नृत्यति कपियुगलेऽप्यभिरामे॥

विविधवर्णरुचिरां कञ्चुलिकां
परिधत्ते वानरी रसनिकाम्।
कटिकौपीनं शीर्षटोपिकां
लगुडं धत्ते कपिः प्रयाणे।।

कुपितः कपिस्ताडयति गृहिणीं
श्रयति मूर्च्छिता सा खलु धरणीम्।
विलपति बहुशः पश्चात्तप्तः
कपिः प्रियार्थं रोषविरामे।।

बोधमवाप्य वानरी रुष्टा
मातृगृहं गच्छति किल दुष्टा।
भृशमनुनयति वानरो दीनः
साञ्जलिपुटं प्रियां परिणामे।।

अथाधुना भार्यामानेतुं
श्वसुरगृहं गच्छत्यनुनेतुम्।
मुखश्रियं पश्यति बहुवारं
लघुमुकुरे मर्कटोऽभिरामे।।


मार्कटिकः कथयति सस्नेहं
गच्छ सुतनु! पत्या सह गेहम्।
नहि नहीति सा शिरश्चालनै-
र्भृशं निषिध्यति लोकविधाने।।

लाङ्गूलेनाकृष्य मर्कट-
स्तामानयति गृहं स्वं सुभटः।
सकरतलध्वनि हसन्ति सर्वे
द्रव्यं ददति नृत्यपरिणामे।।

❑❑

❑ उद्यानपरिचयः


20. इदमुद्यानम्॥



इदमुद्यानं बहुपुष्पयुतम्
इदमुद्यानं बहुफलान्वितम्॥

प्रान्ते-प्रान्ते शिंशपाद्रुमाः
शीतलमञ्जुलमधुरच्छायाः।
प्रतिकोणञ्चात्र विराजन्ते
न्यग्रोधाः खलु भीषणकायाः॥

पवनान्दोलितपल्लवचलितम्
इदमुद्यानं बहुवृक्षयुतम्॥



पंक्तिःक्वचिदस्ति रसालानां
क्वचिदस्ति पनसबदरीवनिका।
पञ्चषाः कपित्था मध्यवने
क्वचिदारूढ़ा द्राक्षालतिका।।

जम्बूक्षीरिणीसुधाभरितम्
इदमुद्यानं बहुवृक्षयुतम्।।



पिञ्जरवर्णा ननु मञ्जर्यः
सहकारतरौ सन्दृश्यन्ते।
प्रवहति समीरणे सौरभ्यै-
र्भूनभोदिगन्ता मोदन्ते।।

चातकपिकभृङ्गैरनुरणितम्
इदमुद्यानं बहुवृक्षयुतम्।।

हरितं पीतं रक्तं शबलं
विविधाकारं च रसालफलम्।
आकर्षति दृष्टिं सर्वेषां
नन्दयति निपत्य च भूमितलम्।।

वृद्धैः शिशुभिस्सततं भरितम्
इदमुद्यानं बहुवृक्षयुतम्॥

शर्करामधुरिमाणं सूते
मधुगन्धि पनससहकारफलम्।
चिञ्चाऽम्लत्वं च कषायत्वं
सूते क्षीरिणी कपित्थफलम्॥

षड्रसैरुदारैः संवलितम्
इदमुद्यानं बहुवृक्षयुतम्॥

मा ताडय भो लगुडाघातै-
र्लोष्टक्षेपैर्वा फलवृक्षम्।
एते युष्माकं बन्धुजना
उपकुर्वन्ति न किं प्रत्यक्षम्॥

स्वयमपि रोपय तरुलताशतम्
इदमुद्यानं बहुवृक्षयुतम्॥

❑❑



❑ पुष्करिणीपरिचयः

21. अभिरामा पुष्करिणी!!



इयमस्ति ललामा पुष्करिणी
जनमनोऽभिरामा पुष्करिणी॥

पुष्करिणीयं हिमशुभ्रजला
विस्तृतपुलिना विकसितकमला

परिमला ऽभिरामा पुष्करिणी।
जनमनो ऽभिरामा पुष्करिणी॥

टिटिट्भबकहंसगणैर्निचिता
जलचारिविहङ्गैस्सङ्कुलिता

कलरवाऽभिरामा पुष्करिणी।
जनमनो ऽभिरामा पुष्करिणी॥

क्रीडन्ति जलैरस्यां शिशवः
विहरन्ति सुखं ग्रीष्मे पशवः

सन्तापविरामा पुष्करिणी।
जनमनो ऽभिरामा पुष्करिणी।।

परितः पुष्करिणीं तरुपङ्क्तिः
वटजम्बुरसालमधूकततिः

फलभरपरिणामा पुष्करिणी।
जनमनो ऽभिरामा पुष्करिणी।।

गुञ्जन्ति मधुपयूथा मधुरम्
गायन्ति च विहगाः कलस्वरम्

प्रतिपला ऽभिरामा पुष्करिणी।
जनमनो ऽभिरामा पुष्करिणी।।

प्रवहति पवनो मन्दं मन्दम्
लालयति तरङ्गैः सानन्दम्

कुन्तला ऽभिरामा पुष्करिणी।
जनमनो ऽभिरामा पुष्करिणी।।


अगणितकूपानां दायभरम्
पुष्करिणी निर्वहति प्रचुरम्

वैभवा ऽभिरामा पुष्करिणी।
जनमनो ऽभिरामा पुष्करिणी।।

❑❑

❑ नदीपरिसरपरिचयः

22. वहति नदी!!



ग्रामं निकषा वहति नदी मे
क्षीरधवलजलधारा।
जानुदघ्नसलिला ग्रीष्मर्तौ
प्रावृषि दुर्गमपारा॥

तीरे-तीरे नदीमुभयतः
शरवणमस्ति विशालम्।
फुल्लति यत्र मधौ प्रतिशाखं
शाल्मलिजम्बूरसालम्॥

अस्तङ्गते रवौ प्रतिसन्ध्यं
नृत्यति मुदा मयूरः!

यद् दृष्ट्वा पुलकित इव रिङ्गति
सुभगनदीजलपूरः।।

मीनाशनलोलुपास्तटस्थाः
क्वचिद्बका दृश्यन्ते।
क्वचित्समतले जलेऽपि कुटिलं
जलौकसः ढौकन्ते।।

टिट्टिट्टिदिति रटन्ति टिट्टिभा
डयमाना आकाशे।
शिशुमारा दृश्यन्ते शनकै-
र्नद्याः सलिलविलासे।।

नौका नयति पथिकजननिवहं
निरन्तरं परपारम्।
कैवर्तकोऽपि गायति गीतं
सुखदं व्यथाविदारम्।।


क्वचिद् भ्रमिर्दृश्यते विलोला
क्वचिदावर्तकमाला।
क्वचित्प्लवन्ती फेनसंहतिः
शङ्खशुक्तिशैवाला।।

ग्रामवासिनां ननु जननीयं
सर्वतौ समुदारा।
रक्षणभरणपोषणैर्दधती
सर्वसुखं सुखसारा।।

❑❑

❑ वसन्तर्तुपरिचयः

23. ऋतुराजोऽयम्



विलसति विपिने ऋतुराजोऽयम्।
सुखमेति विहङ्गसमाजोऽयम्।।

शीतलमन्दसुगन्धसमीरः
रसयति मदयति सुखयति धीरः

अवतरति वने ऋतुराजोऽयम्
सुखमेति विहङ्गसमाजोऽयम्।।



भ्रमरा भ्राजन्ते तरौ - तरौ
शिखराः शोभन्ते गिरौ-गिरौ

पुष्यति सुषमामृतुराजोऽयम्
सुखमेति विहङ्गसमाजोऽयम्।।

मञ्जरितं क्वचिद् रसालवनम्
गन्धयति निखिलवातावरणम्
कोकिलै रौति ऋतुराजोऽयम्
सुखमेति विहङ्गसमाजोऽयम्।।
उष्णतां किरति साम्प्रतं रविः
फाल्गुनिकं गायति लोककविः
कौतुकं सृजति ऋतुराजोऽयम्
सुखमेति विहङ्गसमाजोऽयम्।।



चातको रटति ननु पिहू-पिहू
पिकपुञ्जः क्रन्दति कुहू-कुहू
चेतनां हरति ऋतुराजोऽयम्
सुखमेति विहङ्गसमाजोऽयम्।।
रक्तं दृश्यते पलाशवनम्
सुखदं सायं प्रातस्सवनम्

भूतले वियति ऋतुराजोऽयम्
सुखमेति विहङ्गसमाजोऽयम्।।
नाधिकतापो नाधिकशीतम्
भूतलं समन्तान्मधुगीतम्
प्रतिवस्तु लसति ऋतुराजोऽयम्
सुखमेति विहङ्गसमाजोऽयम्।।

❑❑

❑ वर्षर्तुपरिचयः


24. समागतो जलदागममासः!!




समागतो जलदागममासः।
अमितः परितो हर्षोल्लासः॥
पथि-पथि विलसति गोपवधूटी
अरुणतनुः सुखवैभवदूती
कृषकाणामधरेऽमितहासः।
समागतो जलदागममासः॥
क्षेत्रे वपति कोऽप्यसितमाषम्
ब्रीहिं शणं तिलं श्यामाकम्



लाङ्गलिकोऽद्य शमितसंत्रासः।
समागतो जलदागममासः॥
इन्द्रधनुः समुदेति पवित्रम्
सप्तवर्णभूषितं विचित्रम्
मेघावृतो नील आकाशः।
समागतो जलदागममासः॥



वर्षति मेघो यदा प्रचण्डम्
झटिति पूरयति धराकरण्डम्
पुष्पैः स्फुरति निसर्गोल्लासः।
समागतो जलदागममासः॥
विद्योतन्ते निशि खद्योताः
जलधौ यथा भ्रान्तजलपोताः



दीपा यथा मन्दलघुभासः।
समागतो जलदागममासः॥
विलपति मेघे दीनकुटीरम्
त्रुटितच्छदि भग्नप्राचीरम्
हसति महाजनसौधनिवासः।
समागतो जलदागममासः॥

❑❑

❑ दीपमालिकापरिचयः

25. दीपमालिका



समागतेयं दीपमालिका
प्रभाऽऽकृतीनां चित्रशालिका॥

तमसामद्य विनश्येद् वंशः
अद्य भवेत्संसारो हंसः।
भारतमातुः शुभ्रशाटिका
समागतेयं दीपमालिका॥

ग्रन्थं पठ धारय वैदुष्यम्
अपसारय मनसः कालुष्यम्।

सुघटीयं सौजन्यपालिका
समागतेयं दीपमालिका॥

जननी कमलालयामुपास्ते
पिता गणपतिं सदयं कुरुते।
शुभलाभप्रसवा मृणालिका
समागतेयं दीपमालिका॥



हिन्धि मनसि दुर्व्यसनरावणं
प्रत्यावर्तय विनयराघवम्!
मुक्त्ता स्यान्मिथिलाकुमारिका
समागतेयं दीपमालिका॥

द्यूतं चौर्यं क्रौर्यं शाठ्यम्
परिहर मद्यं, वर्धय दाक्ष्यम्।
क्व नु काकी, क्व पुनर्मरालिका!
समागतेयं दीपमालिका॥

नृत्य कूर्द ननु खेल समोदम्
मित्रैः सह कुरु विविधविनोदम्।
सत्संकल्पानां प्रपालिका
समागतेयं दीपमालिका॥

गृहे-गृहे लाजामिष्टान्नम्
महानसे विविधं पक्वान्नम्।
वरदा सुखदा देवबालिका
समागतेयं दीपमालिका॥

❑❑

❑ होलोत्सवपरिचयः

26. समागता मोदाय होलिका!!




रक्तपीतहरितैः पटवासैः
विविधवर्ण आकाशः।
नर्तन-वादन-गायनादिभि-
र्नो कुत्राऽप्यवकाशः।।

समागता मोदाय होलिका।
भेदभावदहनाय होलिका।।

दिवसेऽस्मिन् सर्वेऽपि समानाः
कोऽपि न धनी, न दीनः।
नोच्चः कोऽपि, न वा खलु नीचः
कोऽपि न कृशो, न पीनः।।

तुल्या सर्वेषां प्रतोलिका
समागता हर्षाय होलिका।।
सप्तवर्णलेपितकलेवरो
भाति कोऽपि बहुरूपः।
कोऽपि भैरवः कोऽपि पिशाचः
कोऽपि च शोणितयूपः।।



काऽपि भामिनी भाति कालिका
समागता सख्याय होलिका।।
क्रीडत कूर्दत हसत खेलत
परस्परं निर्भरमालिङ्गत।


स्नेहबन्धवर्धनमहोत्सवे
फाल्गुनिके वैरं विस्मरत॥
ईर्ष्याऽमर्षद्वेषदाहिका
समागता भद्राय होलिका॥

निनदति पणवः क्वणति च कांस्यं
झङ्कुरुते झर्झरिका रम्या
फाल्गुनिकं गीयते छविल्लैः
व्रजमण्डलगीतिस्सा रसिया
सर्वत्रापि मुकुन्दराधिकाः
समागता भव्याय होलिका॥

❑❑

❑ कृषकपरिचयः

27. भारतकृषकोऽयम्!!



स्वेदजलाञ्चितनिखिलशरीरः
कृषिभूमौ तिष्ठति को वीरः
मनसि जपन्निव सोऽहं सोऽहम्
माणवकाः ! भारतकृषकोऽयम्।।

संस्कुरुते भूमिं शर्करिलां
दूर्वा-मुस्ता-वास्तुकजटिलां
कृन्तति कीटतृणकसन्दोहम्
माणवकाः ! भारतकृषकोऽयम्।।

नोपानहौ न वोपरि वस्त्रं
स्कन्धे परशुः करे दरित्रं
हृदि बिभर्ति पृथ्वीं प्रति मोहम्
माणवकाः ! भारतकृषकोऽयम्।।



बीजाङ्कुरा यदा जायन्ते
रक्तपीतकृष्णभां लभन्ते
माद्यति दृष्ट्वा क्रमाधिरोहम्
माणवकाः ! भारतकृषकोऽयम्।।

स्वोपार्जितविविधाऽन्नसमृद्धया
राष्ट्रं पुष्णात्ययं स्वबुद्धया
दत्वाऽन्नैः काञ्चनमथ लौहम्
माणवकाः ! भारतकृषकोऽयम्।।

कृषिरेका राष्ट्रोन्नतिमूलं
हरते सैव सर्वविधशूलं
सूते सततमभीप्सितदोहम्
माणवकाः ! भारतकृषकोऽयम्।।


❑❑

❑ नदीनां परिचयः

28. नदीगीतम्



तुहिनाचलनलिनी गङ्गा
अस्माकं जननी गङ्गा॥
क्वचित्फेनिला, क्वचिन्निर्मला
क्वचिच्च शैवलिनी गङ्गा॥



हरद्वारतो ब्रह्मावर्तं ब्रह्मावर्तात् तीर्थपतिम्
तीर्थपतेरपि पुरहरनगरीं ततोऽपि सिन्धुं सरित्पतिम्
समुच्छलन्ती कूर्दन्ती ननु
समुपयाति हरिणी गङ्गा।।

मध्येमार्गं संगच्छति कालिन्दी यमुना नीलजला
सरयू नारायणी गोमती तमसा चापि शोणतरला
भगिनीभिस्सह मोदमानसा
पुरस्सरति तरुणी गङ्गा।।

विन्ध्यक्षेत्रे वहति नर्मदा पूतजला मेकलकन्या
वेत्रवती क्षिप्रा निर्विन्ध्या चर्मण्वती चापि वन्या
कावेरी पावयति दक्षिणं
कृष्णा शृङ्गधुनी तुङ्गा।।

गोदावरी दण्डकारण्ये फल्गुश्चापि गयादेहे
असमे ब्रह्मपुत्र आतनुते महानदी चोत्कलगेहे
वहति कुरुक्षेत्रे सरस्वती
पुण्या दृषद्वतीसङ्गा।।

हिमाचले ऽपि शतद्रुविपाशे, भाति वितस्ता काश्मीरे
पञ्चनदे च सिन्धुसहचर्यो भुक्तिमुक्तिर्यत्तीरे
नदीमाल्यमण्डितं भारतं
यत्सुमेरुभूता गङ्गा।।

❑❑

❑ तीर्थानां परिचयः

29. तीर्थगीतम्


भारतराष्ट्रं तीर्थपावनम्॥

बदरीवने वसति बदरीशो गौरीशः केदारे

समतलभूमौ विशति जाह्नवी रमणीये हरद्वारे

भारतराष्ट्रं तीर्थपावनम्॥





यमुनागङ्गापावनभूमौ विलसति ननु प्रयागः

गङ्गातटे मुक्तिदा काशी यस्यां शिवाऽनुरागः

भारतराष्ट्रं तीर्थपावनम्॥

दशरथनन्दनजन्मभूमिरथ महिताऽयोध्यानगरी


मथुरा कृष्णजन्मपरिपूता श्रितवृन्दावनलहरी


भारतराष्ट्रं तीर्थपावनम्॥

पुरी कलिङ्गे, तमिले काञ्चीमदुराईश्रीरङ्गम्

आन्ध्रे तिरुपतिदेवस्थानं यस्यैश्वर्यमभङ्गम्

भारतराष्ट्रं तीर्थपावनम्।।





गोकर्ण-क्षेत्रं कर्णाटे मरुभुवि नाथद्वारा

सौराष्ट्रे सोमेश्वरलिङ्गं कृष्णपुरी सा द्वारा

भारतराष्ट्रं तीर्थपावनम्।।

क्वचिदुज्जयिनी महाकालिनी किञ्च शक्तिपीठानि

क्वचिद् विराजन्तेऽत्र भारते बौद्धजैनतीर्थानि

भारतराष्ट्रं तीर्थपावनम्।।



पञ्चनदे सिक्खानाममृतसराख्यं पावनतीर्थम्
अजमेरे मुस्लिमबन्धूनां प्रथते चिश्तीतीर्थम्
भारतराष्ट्रं तीर्थपावनम्।।
चारं-चारं तीर्थनिकाये भवति मानसं शुद्धम्
सर्वधर्मसमभावमण्डितं रात्रिन्दिवं प्रबुद्धम्
भारतराष्ट्रं तीर्थपावनम्।।

❑❑

❑ महोत्सवानां परिचयः

30. महोत्सवाः सर्वे रमणीयाः

महोत्सवाः सर्वे रमणीयाः
क्वचित्त्वदीयाः क्वचिन्मदीयाः॥
नृत्यगीतचर्चरीमण्डिता
सिक्खानां वैशाखी।
भगिनीनां सौहार्दसूचिका
स्नेहमण्डिता राखी॥




गृहे-गृहे ननु निखिले राष्ट्रे
छविर्दृश्यते स्वीया॥
ईदोत्सवदिवसे ननु सर्वे
विस्मरन्ति निजवैरम्।



नवसौहार्दमुपेत्य कुर्वते
नूतनसख्यं स्वैरम्।।
परमेश्वरसाम्राज्ये तनुते
महती कृपा तदीया।।



खैस्तानामुत्सवस्ततो ऽसौ
भवति दिसम्बरमासे।
यीशुजन्ममङ्गलं विधत्ते
करुणां हृदयाकाशे॥
पर्वदिने केवलमस्माभिः
प्रभोः कृपा स्मरणीया॥



स्वतन्त्रतागणतन्त्रदिवसयोः
सर्वोपरि प्रतिष्ठा।
भारतभाग्यविधातरि सर्वैः
यदाऽवेद्यते निष्ठा॥
अस्मिन् दिवसे देशवासिभिः
मृतस्मृतिः करणीया॥

❑❑

❑ प्रकृतिशिक्षापरिचयः

31. निसर्गशिक्षा


लोष्टलगुडघातं सोढ्वाऽपि कार्यः परोपकारः।
शिक्षयतेऽस्मान् तदिदं विपिने फलावनतसहकारः॥




मर्यादा न परित्याज्या सागरस्तरंगैर्ब्रूते।
वात्यायां तिष्ठेदचञ्चलो गिरिरिति मतिं प्रसूते॥



सद्गुणसञ्चयने प्रतिक्षणं समुद्यमः करणीयः।
मधुमक्षिकेत्युपदिशति नित्यं मधुकोषो रचनीयः॥



स्वगुणसौरभैर्वातावरणं मङ्गलमयं विधेयम्।
पुष्पमिदं शिक्षयते सर्वान् जगते ऽखिलं प्रदेयम्॥
फलभारैर्नमिता तरुशाखा कथयति वारं वारम्।
प्राप्य समृद्धिं भवत विनम्रा इदमेवोन्नति-सारम्॥



कूजन् पिको वसन्ते कथयति गुणः प्रकाश्यः काले।
प्रावृषि मौनमुपेत्य सन्दिशति निभृतं वसेदकाले॥
महाबली सन्नपि न पीडयति पश्यसौम्य गजराजम्
शक्तिमवाप्य भवेन्ननु शान्तो बोधयतीति समाजम्॥




संसारेऽस्मिन् सर्वेभ्यः किल यत्किञ्चिदपि ग्राह्यम्॥
परिहरणीयं कुटिलकल्मषं मङ्गलमयञ्च धार्यम्॥
स्वर्गादपि गरीयसी जननी जन्मधरेति समीक्षा।
तद्रक्षायै भवतु जीवनं सेयं निसर्गशिक्षा॥

❑❑

❑ लौहपथगन्त्रीपरिचयः

32. लौहपथगन्त्री गच्छति!!

पश्य लौहपथगन्त्री गच्छति।
जनसमूहसुखयित्री गच्छति।।
क्षणे मेघमालेव नदन्ती
शतह्रदेव क्षणे स्फुरन्ती
विविधनादलयकर्त्री गच्छति
पश्य लौहपथगन्त्री गच्छति!!



छुक्-छुक् खट्-खट्-सररररकरणी
शतगवाक्षनयना सुखसरणी
रोगशोकभयहर्त्री गच्छति
पश्य लौहपथगन्त्री गच्छति!!

दिल्लीतः प्रयाति कलिकाताम्
जम्मूतो मुम्बईं विभाताम्
नगरतीर्थगमयित्री गच्छति
पश्य लौहपथगन्त्री गच्छति!!

अधिशायिकं लसन्ति शयानाः
साधारणकक्षेषु कृषाणाः
सर्वजनाऽभ्युदयित्री गच्छति
पश्य लौहपथगन्त्री गच्छति!!

शीत्करणीं वादयति रक्षकः
श्रुत्वा यां चालयति चालकः
बालपुलकजनयित्री गच्छति
पश्य लौहपथगन्त्री गच्छति!!

सर्वमत्र वर्तते ललामम्
सग्धिसपीतिमनोज्ञविधानम्
व्यजनैः शीतलयित्री गच्छति
पश्य लौहपथगन्त्री गच्छति!!

मा मा ऽऽ विलय थूत्कृतैरेनाम्
मा च रुन्धि मध्येपथमेनाम्
योगक्षेमविधात्री गच्छति
पश्य लौहपथगन्त्री गच्छति!!

❑❑

❑ कथापरिचयः

33. चौरो राजा!!

अश्वारूढः कश्चिद्राजा गच्छन्नासीद् महावने
चटकाया अण्डकयुगलं सः समपश्यन्नीडायतने॥
कौतूहलाऽक्रान्तहृदयोऽसौ चोरितवानण्डकयुगलम्
आखेटार्थी पुनः प्रतस्थे, चटकाऽपश्यन्नृपच्छलम्॥



चौरो राजा चौरो राजा चोरितवान्मे ऽण्डकद्वयम्
अनुसृतवतीति संक्रन्दन्ती जातं येन नृपस्य भयम्॥



समुत्सारिता वारं-वारं राजसहायैर्धूलिचयैः
चटका नैवाऽत्यजत् स्वाग्रहं नैव च भीता राजभयैः॥

प्रतिमार्गं प्रतिवनं नृपालं साऽनुससार भग्नहृदया
चौरो राजा चौरो राजा विलपन्तीति हता व्यथया॥



आखेटानन्तरं स राजा प्रत्यागच्छत्प्रासादम्
स्नात्वा भुक्त्वा गतोऽधिशय्यं, न मनागपि किन्त्वाह्लादम्॥

चौरो राजा चौरो राजा ध्वनिरिति सर्वतोऽपि मुखरः
तस्य कर्णयोः समागतोऽसौ निद्रां लेभे नैव वरः॥

तावदेव सोऽपश्यच्चटकां वातायने निषीदन्तीम्
चञ्चुपुटाभ्यामस्फुटवाचा चौरो नृप इति कथयन्तीम्॥

अश्रुपूरितं लोचनयुगलं चञ्चुपुटं हा तृषार्दितम्
सततोड्डयनजर्जरं गात्रं दृष्ट्वा तस्या व्यथान्वितम्।।

पश्चात्तापसागरे मग्नो राजा खेदं परं ययौ
दीनां चटकां क्षमां ययाचे परवेदनाकातरो बभौ।।



स्थापितवान् स्वयमेव कुलाये चटकाण्डकयुगलं सकृपः
चौर्यकलङ्कान्मुक्तो भूत्वा परमाह्लादमवाप नृपः।।

समुच्छलन्ती कूर्दन्ती चटकाऽपि गतवती नृत्यन्ती
दानी राजा दानी राजा गीताक्षरमिति गायन्ती।।

❑❑


❑ दिशा-विदिशापरिचयः

34. दिशा विदिशाः!!


उदयति यस्यां दिशि दिनमाली
सैव विद्यते प्राची!
अस्तमेति यस्यां सन्ध्यायां
सैवोच्यते प्रतीची॥



यस्यां दिशि तिष्ठति हिमालयः
सा खलु भवत्युदीची।
यस्यां दिशि कन्याकुमारिका
विख्याता साऽवाची॥
प्राची पूर्वदिशाऽपि कथ्यते
ऐन्द्री सैव ललामा।



पश्चिमदिशा प्रतीची ख्याता
वरुणरक्षिता श्यामा।
उत्तरदिशाऽप्युदीची रम्या
यत्र वसति धनदेशः।
दक्षिणदिशा ऽप्यवाची नूनं
यत्र यमस्य निवेशः॥



ईशानः कोणो विराजते
पूर्वोत्तरसङ्गमने।
दक्षिणपूर्वसङ्गमेऽप्यग्निः
निवसति यः किल दहने॥
नैऋत्यः कोणोऽपि विद्यते
दक्षिणपश्चिममध्ये।
वायव्यः कोणोऽथ राजते
पश्चिमोत्तरे भव्ये॥
सन्ति चतस्रो दिशाश्चतस्त्रो
विदिशाश्चापि तदेवम्।
यो जानाति स एव पण्डितो
दिशानाम तद्देवम्॥

❑❑

❑ आत्मपरिचयः

35. भारतीयोऽहम्!



विश्वकल्याणे मतिः

विश्वनिर्माणे रतिः

भारतीयो भारतीयो भारतीयोऽहम्।

भारतीयो भारतीयो भारतीयस्त्वम्॥ 1॥

उत्तरस्यां हिमगिरिः प्रहरीव भूबन्धुः

दक्षिणस्यां क्षालयत्यङ्घ्रिं महासिन्धुः

मृत्युमुक्ता अपि सुराः

कीर्तिगायनतत्पराः

भारतीयो भारतीयो भारतीयोऽहम्।
भारतीयो भारतीयो भारतीयस्त्वम्।।2।।
कर्म कुर्वन्नेव याचेऽहं शतायुष्यम्।
सूनृतां वाचं दधे काङ्क्षे न पारुष्यम्।
श्रेयसां मार्गं वृणे
श्रद्दधे च तृणे तृणे
भारतीयो भारतीयो भारतीयोऽहम्।
भारतीयो भारतीयो भारतीयस्त्वम्।। 3।।



सौहृदे कुसुमादपि प्रचुरं मृदुत्वं मे
शात्रवे वज्रादपि प्रचुरं दृढत्वं मे

कोमलो मलयानिलः

दारुणो झञ्झानिलः

भारतीयो भारतीयो भारतीयोऽहम्।

भारतीयो भारतीयो भारतीयस्त्वम्॥ 4॥

बालुकातस्तैलमुद्धर्तुं न किं जाने!

क्रुद्धसिंहीमप्यहं दोग्धुं न किं जाने!

नन्वमृतपुत्रोऽस्म्यहम्

मृत्युभयमुक्तोऽस्म्यहम्

भारतीयो भारतीयो भारतीयोऽहम्।

भारतीयो भारतीयो भारतीयस्त्वम्॥ 5॥



अङ्गबङ्गकलिङ्गकेरलगुर्जरान्ध्रवृतः

विन्ध्यमरुभूपञ्चनदकश्मीरजम्बुधृतः

गङ्गयाप्यभिषेचितः

भूतले चिरवन्दितः
भारतीयो भारतीयो भारतीयोऽहम्।
भारतीयो भारतीयो भारतीयस्त्वम्।। 6।।

देववाणी संस्कृता मे पावनी भाषा
विश्वभाषाम्बा समृद्धौ न्यक्कृताकाशा
स्वादु यत् काव्यामृतम्
नाकिनामपि सम्मतम्
भारतीयो भारतीयो भारतीयोऽहम्।
भारतीयो भारतीयो भारतीयस्त्वम्।। 7।।

लोकतन्त्रस्थापने सर्वोदये नित्यम्
विश्वशान्तौ विश्वबन्धुत्वे च यत् सत्यम्
देश एषोऽग्रेसरः
विश्वमङ्गलशेखरः
भारतीयो भारतीयो भारतीयोऽहम्।
भारतीयो भारतीयो भारतीयस्त्वम्।। 8।।

❑❑



36. अरिमर्दना वयम्

कामामद्य शिशवः परन्तु युवकाः श्वस्तना वयम्।
वयं शासका वयं सैनिका अरिमर्दना वयम्॥

स्वप्नाः सन्ति सहस्त्रमिता लोचनयोरस्माकम्।
सङ्कल्पाश्चा सहस्त्रमिता नूनं हृदयेऽस्माकम्।

स्वप्नानहो पूरयिष्यामो विक्रमधना वयम्।
सङ्कल्पैः प्रभविष्यामः पुरुषार्थक्षमा वयम्॥1॥

भगीरथोऽहं मयैव गङ्गा धरणीमानीता।
गान्धीभूय मयैव मोचिता राष्ट्रभूमिसीता।



साहसशौर्यपराक्रममण्डितसमराङ्गणा वयम्।
'राणासाँगा' कुलजा देहेऽशीतिव्रणा वयम्।।2।।



निश्चप्रचं मयैव कृतं नवभारतनिर्माणम्।
केरलान्ध्रकर्णाटतमिळबङ्गासमपरिमाणम्।
सुन्दर-शिव-सत्यादिरक्षणे नित्यश्रमा वयम्।
नन्दसूनुवंशीरवोन्मदा गोवर्धना वयम्।।3।।



लोकतन्त्रमिह मया स्थापितं सर्वोदयमूलम्।
येन भारतं विलसति भूत्वा कालिन्दीकूलम्।
निहतौ मयैव रावणकंसावरिकम्पना वयम्
नो बन्धुद्रोहैः, पराक्रमैर्दुर्योधना वयम्।।4।।
वात्यागतिमपि परावर्तितुं ननु ममास्ति शक्तिः।
प्रत्यक्षं प्रकटीकर्तुं चण्डिकां, परा भक्तिः।।

आर्षमहिम्नां समुच्चयाश्चामीकरकणा वयम्।
खरदूषणजीवातुहराः श्रितदण्डकवना वयम्॥5॥
अहं कालिदासोऽहं तुलसी तिरुवल्लुवरोऽहम्।
अहं वेमनोऽहं नरसी मीरा नानकोऽप्यहम्॥
नन्वभङ्गगायनोन्मदा ज्ञानेश्वरजना वयम्।
संसृतिपङ्कैरुपलिप्ता अपि नैरञ्जना वयम्॥6॥



जनन्याज्ञया मया त्रिलोकी त्रिभिः पदैर्नद्धा।
गुरोराज्ञया मयैव सिंही चण्डरवा दुग्धा।
कर्तुमकर्तुमन्यथाकर्तुं निष्कम्पना वयम्।
भारतमातुः स्तन्यपायिनस्तन्नन्दना वयम्॥7॥

❑❑

37. के वयमित्याख्यास्यामः!!



कामामद्य बालाः सुकुमारा अल्पबला निरुपायाः
काले समागते बन्धो! के वयमित्याख्यास्यामः॥

धरागर्भगतबीजसन्निभा वयमङ्कुरिता नूनम्
शनैः शनैः प्रकृतेरवलम्बैस्तीव्रतरं विकसामः।
क्षुपीभूय स्वस्तने प्रभाते, परः श्वस्तने वृक्षाः
घनच्छायशीतलाः न केषां सुखदायिनो भवामः॥

पुष्पैः फलैर्विहङ्गान् पथिकान् किन्न तोषयिष्यामः!
काले समागते बन्धो! के वयमित्याख्यास्यामः॥

पीत्वा-पीत्वा जलं सागरात् मेघीभूय दिगन्ते
समुच्छलन्तः कूर्दन्तो विहरामो गगनेऽनन्ते।

ततो निदाघज्वालाभिः सन्दग्धे धरालवाले
शीतलवर्षाभिः स्नपयामस्तां सम्यग्घनकाले॥
हरितिम्ना संच्छाद्य धरित्रीं वयमलङ्करिष्यामः।
काले समागते बन्धो! के वयमित्याख्यास्यामः॥
वयं यान्त्रिका वयं तान्त्रिका वयं भिषग्दैवज्ञाः
वयं कारवो वयं स्थपतयो वैज्ञानिकगणितज्ञाः।
वयं शासका वयं नयज्ञाः काव्यशास्त्रमर्मज्ञाः
शस्त्रे-शास्त्रे वयं प्रवीणा वयं राष्ट्रनियतिज्ञाः॥
भुवम्मातरं पुत्रीभूय वयं खलु रक्षिष्यामः।
काले समागते बन्धो! के वयमित्याख्यास्यामः॥
लौहपुरुषसन्ततयो रुधिरेऽस्माकं सा दृढशक्तिः
तिलकसुभाषवंशजा, विलसति हृदये भारतभक्तिः।
स्वाभिमानजीविनो वयं राणाशिववीरकुलीनाः
विश्वशान्तिसंस्थापनदक्षा धृतजनगणचिद्वीणाः॥
इतिहासं नूतनं चरित्रैः स्वीयैः रचयिष्यामः।
काले समागते बन्धो! के वयमित्याख्यास्यामः॥
वेदपुराणस्मृतिगीतागङ्गामहिमाऽन्वितवाणी
संस्कृतनाम्नी जयति भारते निखिलविश्वकल्याणी।
पायं पायं यत्प्रतिपाद्याऽमृतममराः सञ्जाताः
वयं विश्वगुरवोऽधुनातना विश्वबन्धुतास्नाताः॥
हिमगिरिगङ्गोदधित्रिवेण्या तीर्थपतिं स्त्रक्ष्यामः।
काले समागते बन्धो! के वयमित्याख्यास्यामः॥

❑❑

38. विहगा एव भवेम

अग्रे जन्मनि हे परमेश्वर! विहगा एव भवेम।
पक्षतिबलैर्यथा वृक्षाद् वृक्षं त्वरया गच्छेम॥1॥

मुक्तं गगनं मुक्ता धरणी मुक्ताः सन्तु दिशाः
मुक्तान्येव दिनानि सन्तु मुक्ताश्च भवन्तु निशाः॥2॥



क्वचित्कूर्दनं क्वचिद्धावनं क्वचिद्योधनं चारु।
क्वचिज्झम्पनं क्वचिन्नर्तनं गायनमपि वन्दारु॥3॥

क्वचिदुद्धूलनमथ क्वचित् सुस्नानं सरोऽवतीर्य।
क्वचिच्छोषणं सूर्यरश्मिभिः पक्षद्वयमास्तीर्य॥4॥



नैव बन्धनं नाऽनुशासनं कस्मादपि नो भीः।
सर्वविधं स्वातन्त्र्यं भगवन्! मङ्गलमयी च धीः॥5॥

अधोऽवतीर्य धरामुपयाता यूथैस्सह विहरेम।
गमनाऽगमनसमुड्डयनाद्यैः सामोदं क्रीडेम॥6॥

अन्नकीटफलपुष्पशाकजलभरिता धरा सुखाय।
उदरभरणचिन्ता नु कीदृशी भोक्ष्यामहे चिराय॥7॥

निशा यापयिष्यामः प्रीत्या शाखाऽन्तरे निलीय।
नो वैरं कलहो न विग्रहो, भेतव्यं न विलीय॥8॥



चञ्चुपुटैः शरपत्रचीवराण्यथवा द्रुतमानीय।
रचयिष्यामो वयं कुलायान् शावानपि सञ्चीय॥9॥

चुं चुं चुं चुं चुमिति चुङ्कृतैः श्रुतिमधुरैरुत्थाय।
अस्मानपि जागरिताञ्छावाः कुर्वन्त्येव हिताय॥10॥

अस्माभिस्सह तेऽपि विहायसि विहरिष्यन्त्यचिरेण।
स्वर्गसुखं भविता स्वाधीनं, ज्ञेयं ननु तत्केन॥11॥

इयत्सुन्दरं रुचिरं मधुरं विहगत्वं समवाप्य
ईश्वर! वयं भवामो धन्याऽत्मानस्त्वां प्रख्याप्य॥12॥

❑❑

❑ प्रभातदर्शनम्

39. रविभास्वरं प्रभातम्



लोचनमुन्मीलय समागतं रविभास्वरं प्रभातम्
अपयातं घनतमोवितानं दिङ्मण्डलमवदातम्॥1॥

सितरेखाङ्कित इवाऽलक्ष्यते बकपङ्क्त्या ऽम्बरभालः
धवलवसनपट्टिकाऽवृतो ननु बृहदुत्सवस्तमालः॥2॥

विकसितमल्लीकुसुमरसामृतरसिकाऽटति मधुपाली
अधिवाटिकमिह रौति सगुञ्जं माद्यति नवशेफाली॥3॥

नृत्यति पारावतोऽनुरक्तश्चटका तनुं धुनीते
निशाविरहितं प्रेक्ष्य सुतं गौर्हम्भारवं प्रसूते॥4॥

मदिरमधूकसुमोद्गतसौरभचयैर्लसन्ति दिगन्ताः।
प्रतिसहकारवनं सन्दधते निभृतपदानि वसन्ताः॥5॥

अनाश्रान्तकण्ठः कलकण्ठः कूजति सदयममन्दम्।
उन्मदयति चातकोऽपि लोकं श्रयन्क्वापि पिचुमन्दम्॥6॥

उदयति रवौ समेऽपि समुदिताः संसरन्ति संसाराः।
प्रवहन्त्यः परिलक्ष्यन्ते हृदि-हृदि बृहदुद्यमधाराः॥7॥

तुहिनकिरणगलिताम्बुबिन्दुचयलसिता विटपिपलाशाः।
रविकरनिकरविभासितवपुषो भान्ति मुकुरसितहासाः॥8॥

पुष्करिणीकमलिनी विलसिता कर्षितबहुविटभृङ्गा।
कारण्डवटिट्टिभबककोकमदिरवचनाऽञ्चदनङ्गा॥9॥

हृदयङ्गतचम्पकप्रभृतिसुमपरिमल एति समीरः।
मदघूर्णितकरिकलभसन्निभो दोलायितकरवीरः॥10॥

शनैः शनैरपहाय पुरन्दरदिशमम्बरतलमध्यम्।
स्फुटदुर्लक्ष्यतनुर्विकर्तनस्समुपसरति धृतभव्यम्॥11॥

❑❑

40. भारतसंस्कृतिकथा विजयते॥

भारतसंस्कृतिकथा विजयते!!
राष्ट्रगौरवं हृदि-हृदि दधती, दिशि-दिशि समुदयते॥
विश्वबन्धुतास्थापनलीना
सर्वधर्मसमभावधुरीणा
कौटुम्बिकपरिवेषविधाने शतयतनं कुरुते॥1॥
आकाश्मीरादा च कुमारीम्
भारतजननीमतिसुकुमारीम्
गुणगणमहितां संस्कृतिवनितां प्रीतिमयीं तनुते॥2॥
ऋषिमुनिकविपरम्परानिरता
मर्यादासमरसता ऽनुगता
सहिष्णुता शिष्टतासहजतासरणिमतनु हरते॥3॥



निर्धनदलितविवशकल्याणी
शरणागतवत्सला पुराणी
राष्ट्री सङ्गमनी च वसूनां सर्वस्मिन् दयते।।4।।

नोऽत्याचारो नैव शातनम्
दैन्यं रणभुवि न च पलायनम्
शक्तिमयी सत्यपि धरणीयं नयं समर्थयते।।5।।



विविधवेषभाषाप्रसवित्री
अर्बुदमितसुतसुताधरित्री
परमेश्वरलीलास्थलिकेयं विश्वं पालयते।।6।।

सागरहिमगिरिरक्षितकीर्तिः
वेदपुराणसमर्थितनीतिः
देवैरपि कलिता यद्गीतिः कर्णसुखं कुरुते।।7।।

रामकृष्णगौतमसुतधन्या


योगक्षेमवती च वदान्या

सत्पथसन्मतिसद्गुणसत्कृतिपक्षमियं हरते॥8॥

ज्ञानभक्तिकर्मणां त्रिवेणी

मुक्तिसौख्यसंश्रयनिःश्रेणी

गङ्गा सहृदयतां चैतन्यं सरस्वती वहते॥9॥



लोकतन्त्रपरिपालनसिद्धा

असिकृषिमसीत्रितयपरिणद्धा


आर्हतसौगतवैदिकमार्गैर्जगदखिलं श्रयते॥ 10॥

❑❑


41. भारतीयासंस्कृतिः पुनरेधताम्।।



विन्दते स्वाधीनता पञ्चाशतं
भारतीया संस्कृतिः पुनरेधताम्!
राष्ट्रमेतत् प्राक्तनं निजगौरवं
स्वार्जवं भूयोऽपि सम्प्रति विन्दताम्।।
तामसी वीता निशा चेतोहरी
दीप्तभारतभास्करो भुवि भासताम्।



भूतलं स्वं स्वं चरित्रं सम्मतं
भारतात्पुनरेकवारं शिक्षताम्।।
संवदन्तु जनाः समं गच्छन्त्वलं
धीमतां हृदयानि साधु समञ्जताम्।
प्रतिगृहं पठ्येत वेदः, संस्कृतं
राष्ट्रभाषाया महिम्ना राजताम्।।
लोकतन्त्रं जनहितं संसाधयेत्
पार्थिवः प्रकृतेर्हिताय प्रवर्तताम्।
रिपुरवो दिशि पश्चिमायां पुनरहो
हूणहन्ता पुष्यमित्रो बोध्यताम्।।
कृत्तबाहुर्दृश्यते भारतधरा
पुनरखण्डं भारतं परिकल्प्यताम्।
यावदास्ते परवशस्सिन्धुर्नदो
राष्ट्रगीतं सार्थकं कथमुच्यताम्?




नैव दैन्यं नैव चापि पलायनं
भारतं वक्तीति रिपुभिर्ज्ञायताम्।
अस्तु सिद्धान्तेषु गान्धिमताऽदरः
व्यवहृतौ वीरस्सुभाषः स्थाप्यताम्।।
सौहृदं सव्येऽपसव्ये शात्रवं
यस्य यद्ध्रुचितं तदेव विचीयताम्।
हृदि-हृदि स्वातन्त्र्यमन्त्रो भूतले
विश्वदेशिकभारतस्य महीयताम्।।

❑❑

❑ राष्ट्रसम्मानगीतम्

42. भारतीयशासनं विजयताम्!!

भारतीयशासनं विजयतां
सत्यमेव जयताम्॥
अविश्रमं खलु जनतातन्त्रम्
लक्ष्यीकृतजनसेवामन्त्रम्
प्रकृतिरञ्जनाद्राजा भूत्वा
श्रियं कोऽपि लभताम्।
निखिलविश्वमार्यं कुर्वाणा
कल्पितजनजनसुखकल्याणा
भारतीयसंस्कृतिः पुराणी
पुनर्नवा तनुताम्॥



शस्त्रे-शास्त्रे भवतु कौशलम्
क्षमाभावभूषितं स्याद्बलम्
नहि दैन्यं, नो वा पलायनं
नीतिरिति ध्रियताम्॥

संरक्षिताः सन्तु सीमानः
स्पृशतु नभो भारतसम्मानः
काञ्चनविहगगौरवं भूयो
राष्ट्रमिदं श्रयताम्॥

सर्वोदयनिरता सुरवाणी
निगमाऽगमसंश्रिता पुराणी
सरस्वती श्रुतमहती राष्ट्रे
हृदि-हृदि महीयताम्॥

राष्ट्रहितं सर्वोपरि भवतात्
राष्ट्रगौरवं स्फुरतु समन्तात्
मुक्ताकाशे ध्वजस्त्रिवर्णो
यशोऽक्षतं दधताम्॥

❑❑

❑ वाणीवन्दनम्

43. किमतः परं त्वदुपायने



न धनार्जने न यशोऽर्जने न च लोकवन्द्यपदार्जने
अयि वाणि! मे यादृशसुखं तव पदकमलयुगलार्चने॥1॥
ऐन्द्रं पदं वारुणपदं कौबेरमपि सम्मतपदम्
स्वर्गास्पदञ्च निरापदं विलसति तव प्रियतार्जने॥2॥
द्राक्षा सिता मधु शर्करा कर्पूरवासितपानकम्
किं किं न मातर्विद्यते त्वदमोघकविताभाजने॥3॥

क्व पुनर्मिलन्ति दिवङ्गताः स्मृतिशेषतां ननु सङ्गताः
पश्यामि किन्तु कवीश्वरान्नित्यं तवैव गृहाङ्गणे॥4॥

क्षणभङ्गुरं किल जगदिदं कथयन्ति सम्मतसूरयः
अद्भुतचिरन्तनता परं समवेक्ष्यते त्वदुपासने॥5॥
स्वीयं बलं निष्पीड्य मां शतशो विपद्भिरपीक्षितम्
मां स्प्रष्टुमपि न च ताः क्षमा लीनं त्वदीयविभावने॥6॥

न च कामयेऽपरवैभवं त्वदुदारकीर्तिकथादृते
विहरान्यहं कोकिलनिभस्तव सौधपरिगतकानने॥7॥
चरितश्रुतौ तव केवलं नितरां कथङ्कथिकोऽस्म्यहम्
मञ्चेऽन्यथा सुतवाग्मिता सिद्धा जननि! वसुधायने॥8॥
व्यतियान्त्यहानि निशाश्च मे भार्यातनयमधुरेक्षणैः।
इह तौ, त्वमसि तत्राऽम्बिके! किमतः परं त्वदुपायने॥9॥

❑❑

❑ संस्कृतप्रशस्तिगीतम्

44. न मृता, म्रियते न मरिष्यति वा





न मृता, म्रियते न मरिष्यति वा
सुरवागमृता सुखदा, वरदा
द्विषतां नियतिं रचयिष्यति वा॥



निगमाऽगमगीतिमयी रुचिरा
रघुनाथकथामहिता मधुरा



पुनरद्य दशाननकर्मरतान्
घननादमुखान् निहनिष्यति वा॥



नरपालभगीरथसङ्कलिता
सुरसिन्धुरियं गगनाद्गलिता



विशदाश्रमभव्यविनाशपरान्
अभिशप्तजनान् गमयिष्यति वा।।



इयमार्षतपोनिधिसञ्चयिनी
विपदां शमनी वसुधोज्जयिनी



इयमञ्चितसंस्कृतिकीर्तिकथा
पुनरद्य भुवं मदयिष्यति वा।।



अमृतादधिकं परिपोषकरी
सुकृतादधिकं भवदोषहरी
पदबन्धरसाऽमृतचारुचयै-
श्चितिनीरसतां रसयिष्यति वा।।

❑❑

45. जयति विबुधवाणी!!

जयति विबुधवाणी ओम् जयति विबुधवाणी
नवरसरुचिरपदाढ्या जनजनकल्याणी!!

वेदपुराणशिवागमषड्दर्शनमहिता
गद्यपद्यकाव्योभयविविधभेदसहिता!!

सङ्गच्छध्वमितीव प्रथितसांमनस्यम्
ऋग्वेदे रोदस्याः शतसहस्त्रदृश्यम्!!



यदुपनिषत्सु ख्यातं जीवजगद्वृत्तम्
रज्जौ सर्पभ्रम इव मायाऽवृतचित्तम्!!

क्रौञ्चवधाच्छ्लोकत्वं याता कवेर्व्यथा
विश्वदुरितहन्त्री सा रामायणी कथा!!

धर्मस्थापनहेतोर्यदभूद् गृहयुद्धम्
महाभारते विलसति तच्चरितं शुद्धम्!!

राष्ट्रियतासन्देशः कविकुलगुरुकाव्ये
शतशतमहितादर्शा यद्दृश्ये श्राव्ये!!

यत्र बाणभट्टानां रसपेशलगद्यम्
यत्र च भवभूतीनां करुणरसं पद्यम्!!
निर्झरजलशिशिराणां गिरिमरुतां नृत्यम्
विन्ध्यपुलिन्दकुटीनां क्वचिददतिदारिद्र्यम्!!



ऋषिमुनिभिः परमेश्वरकृपया यदवाप्तम्
तपोऽनुभवपरिपूतं तदिह समाख्यातम्!!
नेयं भाषामात्रं छन्दोविचितियुता
सुरवाणीयं दिव्या शाश्वतसृष्टिकथा!!
पाश्चात्त्योऽपि विपश्चिच्छ्रीविल्सननामा
यत्कवितामधु पीत्वा जातोऽश्वत्थामा!!
महाकविर्गेटोऽसौ कविकुलगुरुकवने
स्वर्गधरासङ्गमनं समपश्यद्भुवने!!
सुरवाणीनीराजनगीतमिदं महितम्
जनरुचिपोषकरं स्यादभिराजैर्भणितम्!!

❑❑

46. वर्धतां देववाणी!!

चिरं वर्धतां धीमतां देववाणी
शुभं शंसतां श्रीमतां देववाणी॥1॥

स्फुरद्गोमुखात्स्वर्णदीव प्रसूता
पुनाना भुवं भासतां देववाणी॥2॥

यवं सिंहलं स्वर्णभूमिं कटाहम्
अङ्कुर्वती स्फायतां देववाणी॥3॥

प्रसूनोपमानङ्गबङ्गान्ध्रचोलान्
मिथो बध्नती बंहतां देववाणी॥4॥



हिमाद्रेर्मुखादा च कूलात्पयोधेः
समेषां मुखे स्यन्दतां देववाणी॥5॥

स्फुटं कृण्वती विश्वमार्यं समग्रम्
मधुच्छन्दसां जृम्भतां देववाणी॥6॥

निजाऽऽस्थानुकूलाऽध्वभिर्गत्वराणाम्।
गतिं चिन्मयीं कल्पतां देववाणी॥7॥

गलत्प्रीतिमाकन्दनीपैर्मधूकैः
वसन्तोत्सवे क्षीबतां देववाणी॥8॥

प्रभा शाश्वती व्योम्नि वैकर्तिनीयम्
जगन्मण्डले रोचतां देववाणी॥9॥

कवीनामहोरात्रकाव्यप्रकल्पैः
भृशम्मेदतां घूर्णतां देववाणी॥10॥

सतां धर्मसंस्कारशिक्षाव्रतानाम्
सदा हृत्समा स्पन्दतां देववाणी॥11॥



स्वयात्रापथे प्रत्यवायोन्मुखानाम्।
गतिं रक्षसां स्तम्भतां देववाणी॥12॥

भुवि ख्यापिते स्वाभिधानेन वर्षे
प्रतिष्ठापनैर्द्योततां देववाणी॥13॥

पुरा कालिदासैरितश्चाऽभिराजैः
समज्ञां परां विन्दतां देववाणी॥14॥

❑❑

47. संस्कृतं व्रजेत्

गृहे-गृहे, जने-जने संस्कृतं व्रजेत्।
गले-गले, स्वने-स्वने संस्कृतं व्रजेत्॥1॥
भोजयुगं पुनरेतु समाजम्
वदतु कुविन्दोऽपि विबुधवाचम्
बुधे-बुधे, जडे-जडे संस्कृतं व्रजेत्॥2॥
भरतजनानां ननु यदतीतम्
तत्सर्वं सुरवचसि गृहीतम्
पुरे-पुरे, वने-वने संस्कृतं व्रजेत्॥3॥



चिरयुवतिरियं संस्कृतवाणी
निगमागममहिता कल्याणी
नरे-नरे, करे-करे संस्कृतं व्रजेत्॥4॥

विना संस्कृतं याति न शोकः

असंस्कृतश्शोभते न लोकः

चतुष्पथे, वणिक्पथे संस्कृतं व्रजेत्।।5।।

संस्कृतनाम्नी भूतलभाषा

निखिलविश्वबन्धुत्वविकाशा

नतेऽनते, मतेऽमते संस्कृतं व्रजेत्।।6।।



अमृतादपि परिपोषकरीयम्

सुकृतादपि भवदोषहरीयम्

चरेऽचरे भुवनभरे संस्कृतं व्रजेत्।।7।।

❑❑

48. मयस्करं संस्कृतं भवेत्!!

गृहे-गृहे वने-वने संस्कृतं व्रजेत्
स्वरे-स्वरेऽधरेऽधरे संस्कृतं व्रजेत्!!

वदने-वदने विलसतु गीता
रामकथासुधया परिपूता
ऋतम्भरं विकस्वरं संस्कृतं भवेत्!

कविकुलगुरुकविता कल्याणी
श्रुतियुगलं सिञ्चतु सुरवाणी
समुज्ज्वलं बृहद्बलं संस्कृतं भवेत्!



गायतु जयदेवो गोविन्दम्
पुनरपि भोजो भजतु कुविन्दम्
यशस्करं मयस्करं संस्कृतं भवेत्!

संस्कृतमेव सुमङ्गलमूलम्
संस्कृतमेव विनङ्क्ष्यति शूलम्
प्रीतिकरं भीतिहरं संस्कृतं भवेत्!

संस्कृतमेव पिता ननु माता
संस्कृतमेव समेषां भ्राता
जगद्धरं विपद्धरं संस्कृतं भवेत्!

संस्कृतमनुभावयति मुकुन्दम्
सृजति विपद्यपि महदानन्दम्
व्यथाहरं निरन्तरं संस्कृतं भवेत्!



स्वर्गसुखं संस्कृतमिह लभ्यम्
नृपशुमहो यज्जनयति सभ्यम्
अमृतधरं दुरितहरं संस्कृतं भवेत्!
स्वरे-स्वरेऽधरेऽधरे संस्कृतं लसेत्!!

❑❑

49. जयतु संस्कृतम्!!

विश्वभारती जयतु संस्कृतं
राष्ट्रभारती जयतु संस्कृतम्।
दिव्यभारती जयतु संस्कृतं
लोकभारती जयतु संस्कृतम्।।1।।

मर्त्यभारती जयतु संस्कृतं
सत्यभारती जयतु संस्कृतम्।
अमरभारती जयतु संस्कृतं
समरभारती जयतु संस्कृतम्।।2।।



जन-जनभाषा जयतु संस्कृतं
गण-गणभाषा जयतु संस्कृतम्।
संसद्भाषा जयतु संस्कृतं
परिषद्भाषा जयतु संस्कृतम्।।3।।

नागरभाषा जयतु संस्कृतं
पामरभाषा जयतु संस्कृतम्।
शिक्षितभाषा जयतु संस्कृतं
दीक्षितभाषा जयतु संस्कृतम्।।4।।

उच्चैर्नादय, जयतु संस्कृतं
मन्दं नादय, जयतु संस्कृतम्।
स्वैरं नादय, जयतु संस्कृतं
युगपन्नादय, जयतु संस्कृतम्।।5।।



ह्रस्वं नादय, जयतु संस्कृतं
दीर्घं नादय, जयतु संस्कृतम्।
प्लुतं निनादय, जयतु संस्कृतं
श्रुतं निनादय, जयतु संस्कृतम्।।6।।

सुदृढं घोषय, जयतु संस्कृतं
निबिडं घोषय, जयतु संस्कृतम्।
रुचिरं घोषय, जयतु संस्कृतं
प्रचुरं घोषय, जयतु संस्कृतम्।।7।।

गगने घोषय, जयतु संस्कृतं
भुवने घोषय, जयतु संस्कृतम्।
विजने घोषय, जयतु संस्कृतं
भवने घोषय, जयतु संस्कृतम्॥8॥

पठन्निनादय, जयतु संस्कृतं
चलन्निनादय, जयतु संस्कृतम्।
स्वपन्निनादय, जयतु संस्कृतं
तिष्ठन्नादय, जयतु संस्कृतम्॥9॥



नादयाम्यहं जयतु संस्कृतं
त्वमपि निनादय जयतु संस्कृतम्।
घोषयाम्यहं जयतु संस्कृतं
त्वमपि च घोषय जयतु संस्कृतम्॥10॥

सोऽपि नादयतु जयतु संस्कृतं
साऽपि नादयतु जयतु संस्कृतम्।
कोऽपि नादयतु जयतु संस्कृतं
काऽपि नादयतु जयतु संस्कृतम्॥11॥

पिता नादयतु जयतु संस्कृतं
सुतो नादयतु जयतु संस्कृतम्।
मातर्नादय जयतु संस्कृतं
भ्रातर्नादय जयतु संस्कृतम्॥1 2॥

भणतु श्रमिको जयतु संस्कृतं
भणतु कार्मिको जयतु संस्कृतम्।
गायतु पथिको जयतु संस्कृतं
गायतु कृषको जयतु संस्कृतम्॥1 3॥

भणतु याचको जयतु संस्कृतं
भणतु च धनिको जयतु संस्कृतम्।
भणतु सैनिको जयतु संस्कृतं
भणतु च खनिको जयतु संस्कृतम्॥1 4॥



विश्वविजयिनी संस्कृतवाणी
सर्वोदयिनी संस्कृतवाणी।
शान्तिदायिनी संस्कृतवाणी
कान्तिदायिनी संस्कृतवाणी॥1 5॥

कलुषहारिणी संस्कृतवाणी
परुषतारिणी संस्कृतवाणी।
मतिविकासिनी संस्कृतवाणी
हृदुल्लासिनी संस्कृतवाणी॥16॥

धीविलासिनी संस्कृतवाणी
तमोनाशिनी संस्कृतवाणी।
पुष्पहासिनी संस्कृतवाणी
सत्प्रकाशिनी संस्कृतवाणी॥17॥



हरिहरमहितं जयतु संस्कृतं
सुरनरचरितं जयतु संस्कृतम्।
कलितपुराणं जयतु संस्कृतं
मधुमयगानं जयतु संस्कृतम्॥18॥

मन्त्रविलसितं जयतु संस्कृतं
तन्त्र-विलसितं जयतु संस्कृतम्।
प्रविततशास्त्रं जयतु संस्कृतं
प्रथितमहास्त्रं जयतु संस्कृतम्॥19॥

गीतराघवं जयतु संस्कृतं
स्फीतमाधवं जयतु संस्कृतम्।
भूतमङ्गलं जयतु संस्कृतं
भाविमङ्गलं जयतु संस्कृतम्॥20॥

भारतगरिमा जयतु संस्कृतं
भारतमहिमा जयतु संस्कृतम्।
राष्ट्रप्रेमा जयतु संस्कृतं
राष्ट्रस्थेमा जयतु संस्कृतम्॥21॥

राष्ट्रद्वेषं हरति संस्कृतं
प्रान्तद्वेषं हरति संस्कृतम्।
वेषद्वेषं हरति संस्कृतं
भूषाद्वेषं हरति संस्कृतम्॥22॥



वर्णद्वेषं हरति संस्कृतं
जातिद्वेषं हरति संस्कृतम्।
दृष्टिद्वेषं हरति संस्कृतं
पङ्क्तिद्वेषं हरति संस्कृतम्॥23॥

धर्मद्वेषं हरति संस्कृतं
चर्मद्वेषं हरति संस्कृतम्।
कर्मद्वेषं हरति संस्कृतं
मर्मद्वेषं हरति संस्कृतम्।।24।।

हृदयद्वेषं हरति संस्कृतं
समयद्वेषं हरति संस्कृतम्।
उदयद्वेषं हरति संस्कृतं
त्रितयद्वेषं हरति संस्कृतम्।।25।।

संस्कृतमेव कलिं शमयिष्यति
संस्कृतमेव भुवं रक्षिष्यति।
संस्कृतमेव शमं जनयिष्यति
संस्कृतमेव मुदं वितरिष्यति।।26।।

संस्कृतमेव धियं गुणयिष्यति
संस्कृतमेव भियं दमयिष्यति।
संस्कृतमेव भुवि प्रचरिष्यति
विश्वमेकसूत्रे द्रढयिष्यति।।27।।

संस्कृतमेव सर्वजनभाषा
बुधजनभाषा गुणिजनभाषा।
संस्कृतमेव सुजनपरिभाषा
हरिजनभाषा बहुजनभाषा।।28।।

संस्कृतमुत्तरदक्षिणभाषा
प्राची-मध्य-प्रतीची-भाषा।
संस्कृतमखिलमहीतलभाषा
ब्रह्माण्डग्रहमण्डलभाषा।।29।।

पठ संस्कृतां सुधाप्रसवित्रीं
पठ संस्कृतां दयाजनयित्रीम्।
पठ संस्कृतां सत्यसङ्गोप्त्रीं
पठ संस्कृतां मृत्युभयलोप्त्रीम्।।30।।

अभिराजस्यात्मा सुरवाणी
निखिलविश्वभाषाकल्याणी।
चिरयुवतिश्चिन्मयी पुराणी
जयतितरां वाणी गैर्वाणी।।31।।

सप्रणयं सादरं प्रणीतं
राजेन्द्रेण सुरगवीगीतम्।
भवतु सुरद्रुमसौख्यपरीतं
गुणिनां कृते प्रबोधस्फीतम्!!32।।

❑❑

❑ स्वागतगीतम्

50. स्वागतं श्रीमतां व्याहरामो वयम्!!

स्वागतं श्रीमतां व्याहरामो वयम्
अर्चनं वन्दनं कल्पयामो वयम्।।1

धन्यधन्या वयं यद्भवानागतः
प्राप मेघं यथा सन्तपन् पर्वतः
तं महावृष्टिमेघं नमामो वयम्!
अर्चनं वन्दनं कल्पयामो वयम्।।2

भात्यरण्यं यथा कोकिलोत्कूजनैः
स्थानमेतत्तथा श्रीमतां पूजनैः
पूज्यपादातिथिं भावयामो वयम्
अर्चनं वन्दनं कल्पयामो वयम्।।3

नाऽस्ति मेऽर्घ्यं, न पाद्यं, न नैवेद्यकम्
दक्षिणा नाऽप्यहो नापि पाथेयकम्
केवलं दीनतां दर्शयामो वयम्
अर्चनं वन्दनं कल्पयामो वयम्।।4

क्वाऽम्बरस्थो रविः क्वाऽङ्गणे दीपकाः
देवतुल्यो भवान् ते वयं सेवकाः
सद्गुणानां स्तवं श्रावयामो वयम्
अर्चनं वन्दनं कल्पयामो वयम्।।5

सिन्धुतुल्या भवन्तस्तरङ्गा वयम्
त्वद्यशस्सौरभाणां च भृङ्गा वयम्

गुञ्जितैस्ते मनो रञ्जयामो वयम्
अर्चनं वन्दनं कल्पयामो वयम्।।6

आशिषा ते विभो! वर्धनीया वयम्
वत्सलैर्लोचनैर्दर्शनीया वयम्
एतदर्थं भवन्तं श्रयामो वयम्
अर्चनं वन्दनं कल्पयामो वयम्।।7

❑❑

51. व्याहरामो वयं स्वागतं स्वागतम्!!

अस्मदीये कुटीरे भवानागतो
व्याहरामो वयं स्वागतं स्वागतम्।
हे महामान्य! पूजार्ह! वन्द्यातिथे!
कुर्महे ते वयं स्वागतं स्वागतम्॥1



शैलतुल्या क्व ते सद्गुणोत्तुङ्गता
क्वाऽस्मदीयं लघुत्वं शिशुत्वाञ्चितम्।
प्रीतिपूतैर्वचोभिस्तथापि प्रभो!
व्याहरामो वयं स्वागतं स्वागतम्॥2

नास्ति पाद्यं न वाऽर्घ्यं न वा विष्टरं
नापि नैवेद्यजातं किमप्यालये।

भक्तिभावैरसीमैस्तथापि ध्रुवं
व्याहरामो वयं स्वागतं स्वागतम्॥3

दीप्तभानुं यथा पङ्कजानां वनी
श्लाघते पूर्णचन्द्रं त्रियामा यथा।
पक्षिणश्चाभिनन्दन्ति कुञ्जं यथा
व्याहरामो वयं स्वागतं स्वागतम्॥4

त्वं समर्थप्रभुर्हन्त भक्ता वयम्
वन्दनीयो भवान् वन्दनार्ता वयम्।
आवयोरस्ति सम्बन्ध एषोऽनघो
व्याहरामो वयं स्वागतं स्वागतम्॥5

आशिषा श्रीमतां जीवनं चिन्मयम्
धीमयं श्रीमयं ज्ञानदीप्तं भवेत्।
राष्ट्रसौभाग्यरक्षाकराः स्मो वयं
व्याहरामो वयं स्वागतं स्वागतम्॥6


नैव भाषा, न भावो, न पूजाविधि-
र्नापि लोकोपचारे समर्था वयम्।
मुग्धमुग्धाश्चते बालकल्पा विभो!
व्याहरामो वयं स्वागतं स्वागतम्॥7

हे गुरो! त्वत्पदाम्भोजधूलीचयै-
र्नूनमेतत्पवित्रीकृतं मन्दिरम्।
धन्यधन्याः कृतार्था गृहीतास्ततो
व्याहरामो वयं स्वागतं स्वागतम्॥8

❑❑



❑ राष्ट्रमङ्गलगीतम्

52. भारते सर्वं भवेदिह मङ्गलम्!!



उत्तरे स्यान्मङ्गलं ननु दक्षिणे स्यान्मङ्गलम्!
हे प्रभो! मम भारते सर्वं भवेदिह मङ्गलम्!!
वातु शान्तसमीरणः क्वचिदपि न चाऽग्निभयं भवेत्
हे प्रभो! मम भारते वर्षापि तनुतां मङ्गलम्!!
सर्व एव भवन्तु सुखिनः सर्व एव निरामयाः
हे प्रभो! मम भारते सर्वोऽपि लभतां मङ्गलम्!!
यथाऽवसरमुपेत्य गगने जलं वर्षतु वारिदः
हे प्रभो! मम भारते शस्यं नु दधतां मङ्गलम्!!

साक्षराः सर्वे भवन्तु, भवन्तु सर्वोदयरताः
हे प्रभो! मम भारते शास्ताऽपि कुरुतां मङ्गलम्!!

आहिमालयतः प्रभो! यावन्महासागरतटम्
एकसूत्रनिबद्धराष्ट्रे वर्ततां ननु मङ्गलम्!!
जातिभाषाक्षेत्रजनिता भेददृष्टिरशान्तिदा
मा समुत्तिष्ठेत्प्रभो! हृदयेषु रजतां मङ्गलम्!!




स्याद् दृढा भक्तिः समेषां वन्द्यभारतमातरि
जीवनं मरणञ्च तुल्यं जायतामिह मङ्गलम्!!
अङ्ग-बङ्ग-कलिङ्ग-मरुवण-तमिल-केरल-गुर्जरम्
पञ्चनदकाश्मीरहिमगिरिमण्डलेऽञ्चतु मङ्गलम्!!

❑❑

गीतानुक्रमणिका

प

परमेश्वरं न तं जानीथ!

परमेश्वरं य एकं पश्यति

पश्य, लौहपथगन्त्री गच्छति

पिपीलिके! क्व गम्यते?

भ

भारतराष्ट्रं तीर्थपावनम्

भारतसंस्कृतिकथा विजयते

भारतीयशासनं विजयताम्

म

महोत्सवाः सर्वे रमणीयाः

य

यशस्तस्य नित्यं गायामः

र

रक्तपीतहरितैः पटवासैः

ल

लोचनमुन्मीलय समागतं रविभास्वरं

लोष्टलगुडघातं सोढ्वाऽपि

व

विन्दते स्वाधीनता पञ्चाशतं

विलसति विपिने ऋतुराजोऽयम्

विश्वकल्याणेमतिः

विश्वभारती भवतु संस्कृतम्

स

समागतो जलदागममासः

समागतेयं दीपमालिका

स्वागतं श्रीमतां व्याहरामो वयम्

स्वेदजलाञ्चितनिखिलशरीरः

ह

हृदयं विधेहि वितताकाशं

हरितः सन्दृश्यते पादपो यथा